# दत्त प्रकाशः

## श्रीदत्त शतक व्याख्यान ग्रन्थः

अवधूत दत्त पीठम्

श्रीगणपति सच्चिदानन्द आश्रमः

मैसूरु 570025

# पुरो निवेदनम्

**- डा. वंशीकृष्ण घनपाठी**

**श्रीदत्त श्शरणं मम।** भगवतो महाविष्णोरवतारेषु विलक्षणत्वेन कथितो ज्ञानावतारः श्रीदत्तात्रेयेण पुराणेषु सुप्रसिद्धः।

# अवधूत दत्त पीठाधीश्वराणां

# श्रीगणपति सच्चिदानन्द स्वामिश्रीचरणानां

# अनुग्रहवाक्यानि

# परमहंस परिव्राजकाचार्याणां

# श्रीदत्त विजयानन्द तीर्थ स्वामिनां

## मङ्गलाशासनम्

# वक्तव्यम्

**- डा. राणी सुब्बय्य दीक्षितः**

**श्रीदत्त श्शरणं मम।** भगवतो महाविष्णोरवतारेषु विलक्षणत्वेन कथितो ज्ञानावतारः श्रीदत्तात्रेयेण पुराणेषु सुप्रसिद्धः।

# दत्तप्रकाशः

## श्री दत्त शतक व्याख्यानग्रन्थः

### मङ्गलाचरणम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।

अगजानन पद्मार्कं गजानन महर्निशम्।

अनेकदं तं भक्तानामेकदन्तमुपास्महे।।

याकुन्देन्दु तुषार हार धवला या शुभ्रवस्त्रान्विता

या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।

या ब्रह्माच्युतशंकरप्रभृतिभि र्देवैस्सदा पूजिता

सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा।।

दोर्भिर्युक्ता चतुर्भिस्स्फटिकमणिमयी मक्षमालान्दधाना

हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकञ्चापरेण।

भासा कुन्देन्दुशंखस्फटिकमणिनिभा भासमानाऽसमाना

सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना।।

जयगुरुदत्त श्रीगुरुदत्त

# श्रीदत्तशतकम्

## श्रीदत्त प्रकाश व्याख्यान समन्वितम्

**दत्तस्य शतकं पूर्णं व्याचिख्यासामि तत्त्वतः।**

**दत्तप्रकाशवैभोगो नित्यमस्मासु कल्पताम्।।**

ब्रह्मविद् ब्रह्मैव भवतीति श्रुतिवाक्यमात्मज्ञाननिष्ठं सद्गुरुं परमात्मस्वरूपतया प्रस्तौति। सद्गुरपदपंकजाश्रिताः साधकद्विरेफा अपि ध्यानसोपानारोहणक्रमे कण्टकप्रायाणां कर्मविशेषाणां फलं मूरीकर्तुं श्रीचरणचरणानाश्रयन्ति च। तदवसरे भक्त्यावेशनिस्सृता मानसोपप्लव रसधुनी एवशतकरूपेणाविष्कृतेति प्राचीन साहितीकोविदानां समयः। संस्कृतविद्याजुषां सर्वेषां विदितमेवेदम्, यद्वरीवर्ति तद्विदां मनांसि रञ्जयत् काव्यनाटक वचनकाव्यादिषु उत्तमं शतककाव्यरत्नमेवेति। सत्स्वपि कतिपयेषु दत्तात्त्रेयविषय प्रतिपादकप्रबन्धेषु, सर्वाङ्गीणतया प्रतिपादनविषयतया च शतकस्यास्य कथासरणि स्सुधियां समाजमावर्तयन्ती दत्तात्रेय समुपासकमण्डलं मण्डयन्तीव, परितः अपरिहीयमान विभवा अक्षुण्णेव जगति जागर्तीति। रसप्रवाहेस्मिन् पारावारे विराजमानानां शतसंख्याकानां रत्नानां वैदग्ध्यमच्छाच्छशोभतया पाठकहृदयेषु राराजतामित्यारभ्यते गच्छद्व्याख्या दत्तप्रकाशेति नाम्ना।।

- **प्रार्थनम्**

अ.व - तत्र प्रथमतश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं द्वाभ्यां श्लोकाभ्यां सद्गुरु दत्तात्त्रेयस्वरूपं ध्यायन्निर्मलां वाच मुत्पादयितुं निवेदयते, दत्तात्रेयेति।।

**दत्तात्रेय स्वभाव प्रकटन पटिम प्रोज्ज्वलद् ज्ञानभासः**

**सर्वाऽऽत्मत्वा न्मदीयां जडधिय मपि योऽनाविलां चर्करीति।**

**उत्सोत्पन्नाऽऽभ वाचं समुदयतु गुरु र्मामकीनो महेज्यः**

**तद्ब्रह्मण्यं भजेऽहं गणपति यमिनं सच्चिदानन्द दत्तम्।।**

द.प्र –

दत्तात्रेयस्वभाव प्रकटन पटिम प्रोज्ज्वलद्ज्ञानभासः दत्तात्रेयस्य दीनजनोद्धरणस्य कृते महर्षयेऽत्रये स्वात्मानं दत्तवानिति दत्तात्रेयः। "इतो मनुष्यजाते"रित्यपत्यार्थको ढक्प्रत्ययः। तस्य स्वभावः, स्वः आत्मा, आत्मनि आत्मीयार्थे च विश्श्रुतः स्वशब्दोऽत्र गृह्यते। यद्वा – दत्तात्रेय एव स्वः, इत्यभेदोऽध्यवसीयते। तस्य भावस्य प्रकटनम्। प्रपूर्वक कट धातुर्गत्यर्थकः। ज्ञानप्रदानरूपेण भक्तजनानुग्रहणमेवात्र प्रकटनमिति युज्यते। तस्य पटिमा सामर्थ्यं यस्येति। गुणवचनात्पटुशब्दादि मनिच्प्रत्ययः।

अन्यथाऽपि दृश्यत इति वार्तिकेन वर्णवाचिभिन्नेऽपि सङ्गच्छते। तेन पटिम्ना प्रोज्वलन् ज्ञानस्य भासो यस्येति। प्र, उत् - इत्युपसर्गद्वयपूर्वको ज्वलतिश्शतृप्रत्ययान्तः। ज्ञानस्य भासो यस्येति। नैरन्तर्येण भक्तजनानुजिघृक्षा, ज्ञानोपदेष्टृता चेति भगवतो लक्ष्मद्वयं स्वगुरौ गणपति यमिनि सच्चिदानन्दे संलक्षयता, एकरूपता निर्वर्ण्यते। यस्य देवे पराभक्तिर्यथा देवे तथा गुराविति श्वेताश्वतरश्रुतिवचनात्।।

सर्वात्मत्वात् सर्वस्य विश्वस्य आत्मभावः, तस्मात् प्रत्यगात्मभूत स्सन् मदीयां मामकीनां जडधियमपि मन्दबुद्धिमपि अनाविलां दोषरहितां स्वान्तस्थप्रत्यगात्मबोधाभाव एव दोषः, तेन वियुक्तां, चर्करीति पौनःपुन्येन दोषरहितां करोतीत्यर्थः। जन्मान्तरार्जितकर्म वासनाबलान्मुहुर्मुहु र्विस्मृतविज्ञानस्य जीविन श्शोधनमेव क्रियासमभिहारः। तस्मिन् द्योत्ये यङ्लुकि चर्करीतीति। धातोरेकाचो हलादेः

क्रियासमभिहारे यङ्। इति सिद्धस्य यङः, यङोऽचि च इति लुक्। विशोध्य धियं मामकीनः मदीयः। महेज्यः, महती इज्या पूजा यस्मिन्सः महेज्यः।

स गुरुः उत्सोत्पन्नाभवाचं गिरेः प्रस्रवणात् संस्रुतं शुद्धं जलमिव समुदयतु समुदयं करोतु आविर्भावयतु। उत्सः प्रस्रवणं वारि प्रवाहो निर्झरो झरः – इत्यमरः। सम्, उदित्युपसर्गद्वयपूर्वको गत्यर्थकः अयधातो लोट्। अथवा, इण एव आचारार्थः क्यच्। अनुदितां वाचं संशोध्योदितां वाचं वैखरीमनर्गलां निर्मलामाविष्क्रियादिति भावः। तद्ब्रह्मण्यं बुद्धिस्थं परामृशत्तच्छब्दः सर्वात्मकं ब्रह्म वक्ति। तच्च ब्रह्म च तद्ब्रह्म, तस्मिन्भवो रममाणः, तत्र भव इति यत्। तादृशं सच्चिदानन्दात्मक दत्तरूपं गणपति यमिनं गणपति सच्चिदानन्दनाम्ना सुप्रसिद्धं मुनिमहं भजे सेवे।।

अ.व - ततश्च ग्रन्थप्रणयनहेतुं तत्प्रयोजनं फलं संगतिञ्च विवृणोति।।

**चिरतर गुरु सेवा लब्ध वाङ्मन्त्र युक्तां**
**शतमणिमय मालां श्री गुरोः पादपद्मे।**
**विधति पृणति वंशी कृष्ण आत्म प्रसाद –**
**प्रसृत महित विद्या विज्ञता माप्तुकामः।।**

द.प्र –

चिरतरया बहुवत्सरकृतया गुरुसेवया लब्धैरवाप्तैः वाङ्मन्त्रैः वाङ्मयैः, मनुभिर्युक्तां शतसंख्याकैः पद्यरत्नैः ग्रथितां मालामात्मप्रसादेति, आत्मनः प्रसादायात्मज्ञानसुखाय प्रसृतायाः प्रवृत्तायाः महितायाः पूज्यायाः विद्यायाः पराविद्यायाः विज्ञतां विज्ञानभावमाप्तुकामः प्राप्तुमिच्छुः कविः वंशीकृष्णः घनपाठीति नाम्ना विश्रुतः श्रीगुरोः पादपद्मे विधति, विधत्ते। विधविधानेति तौदादिकः। तेन समर्पणविधिना पृणाति, नितान्तं

प्रीणाति। पृण प्रीणन इति क्रैयादिकः। तस्यैते कथिता ह्यर्थाः प्रकाशन्त इति श्रुत्युपपत्तेः। गुरुसेवाफलत्वेन कथिता अकथिता अप्यर्थाः भासन्त इति भावः।

## ➢ अवतारोद्देशः

अ.व - भगवतो दत्तात्रेयस्यावतारप्रयोजनं जनिमृतिवलया- दुन्मोचनमेवेति प्रपञ्चयति।।

**योऽवातारीद् भुवीश स्सकलजनगणो - त्तारणायाद्वितीयः**

**यश्चाऽऽविर्भूय भूयान् गुरुपदगरिम ख्यापनायैव शस्तः।**

**ओब्रह्मात्मा त्रिलोक्या जनिमृतिवलया न्मोचनायाऽऽत्मदा यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 1

द.प्र -

यः अद्वितीयः ईशः परमेश्वरः, वस्तुतः स्वगतपरगतभेदरहितः सन् मायासंसर्गेण संभावितानां सकलजनगणानामुत्तारणाय उद्धरणाय भुवि भूलोके अवातारीत् अवातरत्, तद्ब्रह्मण्यमिति वाक्यशेषः। यः भूयान् जीवात्मापेक्षया अधिकतरः परमात्मेति, आविर्भूय अवतीर्य, गुरुपदगरिमख्यापनाय गुरोः पदस्य स्थानस्य गरिम्णः महत्त्वस्य ख्यापनायैव प्रकथनायैव शस्तः लोके संस्तुतः, त्रैलोक्याः त्रिषु लोकेषु निवासिनां जीविनां जनिमृतिवलयात् मोचनाय, जनेः जन्मनः मृतेः मरणस्य च वलयात् चक्रात् मोचनाय विमोचनाय, ओब्रह्मात्मा अः विष्णुः, उः शंभुः, ब्रह्मा चतुर्मुखो धाता। ओब्रह्मणामात्मा, स्वीकृतरूपस्सन्, यः आत्मदाः आत्मानं ददातीति, (कीलालं पिबतीति कीलालपा इतिवत्) दाता बभूव। त्रिमूर्त्यात्मकं स्वात्मानं जगदर्थे ददाविति भावः।

तद्ब्रह्मण्यं तस्मिन् ब्रह्मणि वेदे भवं स्तुत्यं सदयं कृपायुक्तं सच्चिदानन्द दत्तस्वरूप महं भजे सेवे। सत् सत्यम्, दविकार्यं त्रिकालाबाध्यं, चित् चैतन्यं ज्ञानरूपं, आनन्दः निरतिशयसुखात्मकः इति परस्य ब्रह्मणः स्वरूपलक्षणमत्र योजनीयम्।

एवं रूपायाः त्रिगुणातीतस्थित्या अवतीर्य त्रिगुणान्वितानां जनानामुद्धरणाय सगुणात्मकतां स्वीचकारेति भावः।।

## ➢ जननम्

अ.व - **अवतारोद्देशप्रकटनान्तरं तत्प्रकारं वर्णयति।**

**ऋक्षाद्रौ तापसाभ्या मतुलितमहिम ख्यात दीक्षामहोभ्यां**

**लोकञ्चानुग्रहीतुं प्रकटित इषितो योऽनसूयाऽत्र्यृषिभ्याम्।**

**राकायां मार्गशीर्षे सुकृतिजगदुप स्थापनायात्रिजातः**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।2**

द.प्र – ऋक्षाद्रौ ऋक्षपर्वतसानुषु निर्विन्ध्या नदीतटे, अतुलितेनेति अतुलितेन निरुपमेण महिम्ना महत्त्वेन ख्यातौ प्रसिद्धौ, दीक्षायाः हेतौ यन्महः तेजः ययोस्तौ, ताभ्यां तापसाभ्यां इषितः वाञ्छितस्सन्, यः ईशः लोकं अनुग्रहीतुञ्च प्रकटितः आविष्कृतात्मरूपः। अत्र अवतारकर्मणा पुण्यदम्पती अनुगृह्य, तन्मूलकत्वेन लोकानुग्राहकस्सञ्जात इति समुच्चयश्चकारेण बोध्यते। सुकृतिजगदुपस्थापनाय प्रतिष्ठापनाय, मार्गशीर्षे आग्रहायण्यां राकायां पौर्णमास्यां यः ईशः अत्रिजातः ब्रह्ममानसपुत्रस्य त्रिगुणातीतत्वात् अत्रिरित्यन्वर्थनाम्नः महर्षेः नेत्रात् ज्योतीरूपेणाविर्बभूव, तं दत्तं भजेऽहम्।

गुरोरनुग्रहेणैव धर्ममार्गे सुस्थिराः जनाः सकृतिनो भवन्तीति गुरुव्यवस्थारम्भणाय स्वयं भगवानादिगुरुः बुभूषुरिति, ब्रह्मोत्तरनामक महातपोनिष्ठावतोः अनसूयात्रिदम्पत्योरात्मजो बभूवेति भावः।

## ➢ नामाऽऽदि प्रशस्तिः

अ.व – स्वीकृतप्रशस्तावतारस्य अनुरूपन्नामेति विशदयति।

**दत्तात्रेयाभिधां यो जगदुपकरणे सुप्रतिष्ठां पटिष्ठां**

**नाना कालेषु भक्ता- वन भरण चणां सर्वशक्तां गरिष्ठाम्।**

**स्वीचक्रे ब्रह्मवादि स्तुति मतिरमणीं हर्षयित्रीं पवित्रीं**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 3**

द.प्र –

यः त्रैगुण्यातीतः अत्रितनयः जगदुपकरणे जगतः ब्रह्माण्डात्मकस्य विश्वस्य उपकरणे निमित्ते, (निमित्तसप्तम्येषा) लोकोपकरणाय सुप्रतिष्ठां सुस्थिरां शोभनाप्रतिष्ठा यस्यास्तां पटिष्ठां समर्थां, नानाकालेष्विति - भूतभविष्यद्वर्तमानकालेष्वपि समाश्रितानां भक्तजनानामवने रक्षणे, भरणे संभरणे चणां निपुणां सर्वशक्तां सर्वसमर्थां गरिष्ठां महतीं। ब्रह्मवादीति – परं ब्रह्मवेदं वा वदन्ति चर्चन्तीति, ब्रह्मवादिनः। तेषां स्तुतियुक्ताः मतयः तासां रमणं यस्यास्सा, रमुधातो र्भावे ल्युटि, टित्वात्, ङीपि रमणीति।

हर्षयित्रीं तोषयित्रीं पवित्रीं शोधयित्रीं, पूङ्(पवने) धातोः भौवादिकात् सेटः तृचि ङीपि पवित्रीति। तथाविधां दत्तात्रेयाभिधां दत्तात्रेय इति आख्यां यः त्रिमूर्तिरूपः स्वीचक्रे स्वीयं चकार, एवं रूपं तद्ब्रह्मण्यं भजे।।

**अ.व** - पुनरपि नामसंकीर्तनौचित्यं महत्त्वं च प्रकटयति।

**यद्भूयिष्ठस्य नाम्न स्स्मृतिरपि कुरुते भस्मसात् पापराशिम्**

**यत्प्रेष्ठ प्रार्थनं प्राक् प्रजनयति परं पुण्यकर्मण्यपूर्वम्।**

**यद्द्राघिष्ठ प्रबोधो भव जलधि महो तारयेद् भाव्यमानः**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 4**

द.प्र –

यद्भूयिष्ठस्येति, भूयिष्ठस्य अतिशयितमहिमान्वितस्य भगवतः नाम्नः नामधेयस्य स्मृतिरपि स्मरणमात्रमपि पापराशिं किल्बिषसमूहं भस्मसात् कुरुते। स्वमूलनाशकत्वं प्रतिपाद्यते। स्मरणमात्रेणैव पापनाशे प्रार्थनया किमधिकतया फलं लभ्यते वेत्याकाङ्क्षां समाधत्ते। यत्प्रेष्ठस्येति - प्रेष्ठस्य प्रियतमस्य प्रार्थनं प्रकर्षेण याचनं पुण्यकर्मणि श्रुतिमहितेषु कर्मसु परमपूर्वं महत्पुण्यं प्राक्पूर्वमेव प्रजनयति प्रादुर्भावयति। अवान्तरकर्मजनितमपूर्वं प्रधानकर्मणः अङ्गिनो महापूर्वं प्रयोजयतीति, कर्मसमाप्तेः पश्चान्निमित्तमात्रः ईश्वरः तत्तत्कर्मफलत्वेन जनितस्यापूर्वस्याधारेण कर्तृषु श्रेयः प्रदिशतीति मीमांसकानां मर्यादा। गुरोः सविधे समर्पितं प्रार्थनं भक्त्यतिशयेन चिकीर्षितकर्मणः समाप्तेः प्रागेवापूर्वं सञ्जनयतीति फलविशेषो महीयते। द्राघिष्ठस्य दीर्घतमस्य (ज्येष्ठस्य) प्रबोधः श्रवणमनननिदिध्यानात्मको ज्ञानोपदेशः भाव्यमानः मनसा विचिन्त्यमानोऽपि संसारसागरं मोहशोकरूपं संसारसागरं तारयेत् सन्तारयेत् प्लावयेच्च। जन्माजन्मान्तराणि प्रयास्यतो जीविनः, अपवर्गफलावधि दीर्घतमबोध प्रदायकत्वमेव द्राघिष्ठत्वम्।

नाम प्रार्थन प्रबोधानां शक्त्यतिशयः विस्मीयत इत्यहो शब्दप्रयोगः। तथाविध नामशक्तिवैभवोपेतं तद्ब्रह्मण्यं भजेऽहमिति।

## ➢ उत्कर्षः

**अ.व -**

सृष्टिस्थितिलयकारकत्वेन प्रसिद्धानां त्रिमूर्तीनां कार्येभ्योऽपि प्रोत्कर्षः प्रतिपाद्यते।

**संस्त्रष्टृभ्योऽपि भूया ञ्छ्रितधियि जनयन् ज्ञान वैराग्य भावं**

**संयच्छद्भ्योऽपि भूया नगणित विभव प्रापकत्वान्नतानाम्।**

**सन्दातृभ्योऽपि भूयान् मनसिज दलने यः पटीयस्त्व हेतोः**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 5**

द.प्र –

यः श्रितधियि श्रितानां आश्रितानां भक्तजनानां धियि मनसि ज्ञानवैराग्यभावं ज्ञानभक्तिपर्यवसायिनः ब्रह्मज्ञानस्य, तत्फलभूतस्य वैराग्यस्य च भावं जनयन् उत्पादयन्, निश्श्रेयसोत्पादकत्वहेतोः संस्त्रष्टृभ्योऽपि प्रजापतिभ्योऽपि भूयान् महीयानिति सम्भाव्यते।

नतानां प्रह्वीभव संपन्नानां सेवकानां विषये अगणितानामसंख्याकानां विभवानामैश्वर्याणां प्रापकत्वात् अवापयितृत्वात् संयच्छद्भ्योऽपि जीवनयात्राविधानायावश्यकीं सम्पदं सम्यक् ददद्भ्यो देवेभ्योऽपि भूयान् महीयानिति भावः।

मनसिजदलने शिष्याणां मनसि जायमानानां कामानां दलने विच्छेदने निमित्ते पटीयस्त्वस्य समर्थतरत्वस्य हेतोः कारणात् सन्दातृभ्योऽपि क्षयकर्तृभ्यः रौद्रांशेभ्योऽपि भूयान् महीयानिति संभाव्यते, एवंरूपं तद्ब्रह्मण्यं भजेऽहम्। संपूर्वकदीङ्धातोः तृचि सन्दातेति रूपम्।

## ➢ वेदरूप शुनक साहचर्यम्

अ.व - सर्वात्मत्वेन प्रसिद्धं ब्रह्म, अहमिति प्रकटयितुं श्वरूपिभिः वेदैः सहचरणं भगवतः प्रस्तूयते।

**चैतन्यं नित्यसत्यं जगदधिकरणं निर्द्वितीयं प्रसिद्धं**

**एकं सत् जीवकोटौ प्रभवति हि परं ब्रह्म सर्वात्मकं तत्।**

**एतत् सिद्धान्त माख्यन् विभुरयि रमते विच्छुनां साहचर्यं**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 6**

द.प्र – सर्वात्मकं सर्वाणि भूतान्यात्मनि यस्मिन्तत्, परंब्रह्म नित्यसत्यं नित्यमनाद्यनन्तं सत्यमवितथं सद्रूपं, निर्द्वितीयं स्वगतपरगतभेदेन रहितं, प्रसिद्धं प्रकर्षेण सर्वैरपि जीविभिरनुभूयमानत्वेन सिद्धं, जगदधिकरणं जगतः आधारभूतं, जीवकोटौ एकमेव सत् प्राणिसमूहेषु भिन्नयोनिषु बिम्बप्रतिबिम्बन्यायेन प्रभवति विलसति हि। तथा हि यथैकस्सूर्यो, ह्रद जलाशय नदीकूपकासारघटादिषु अवस्थितेषु जलेषु भिन्नरूपतया लक्ष्यते, तथैवैकं ब्रह्म बहुयोनिषु जीवरूपेण दृश्यते। अतस्ससर्वं ब्रह्म इत्येतत्सिद्धान्तं इमं राद्धान्तमाख्यन् प्रकटयन्, विभुः विशषेण विविधं वा भवन् विश्वाकारो भगवान् विच्छुनां विशां जातिमृतिसमन्वितानां मनुजानां, शुनां वासनामयजीविनां सारमेयाणां, तदुपलक्षितानां तिर्यग्योनीनामपि सर्वप्राणिनां, उपलक्षणमेतत्। साहचर्यं सहवासित्वं रमते लीलाक्रीडया मोदते। अयि भोरिति सम्बुद्धिः। तथा स्वलीलया रममाणं दत्तं भजे।

## ➢ त्रिमूर्ति लक्षणम्

अ.व- ब्रह्मविष्णुमहेश्वरांशयुक्तः अवतीर्णो भगवानिति,तल्लक्षणान् प्रकटयति।

**अब्जं चक्रं कराभ्यां प्रकटयति हरे र्भाव मुच्चै स्त्रिमूर्तिः**

**शम्भुत्वं च त्रिशूलं डमरु मभयदं मध्यमाभ्यां दधानः।**

**वैधात्रं लक्ष्म बिभ्रत् त्त्वजप जपरते स्स्त्रक् कमण्डल्वपो यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।7**

द.प्र –

यः देवः, त्रिमूर्तिः तिस्रः विरिञ्चिहरीशानरूपिकाः मूर्तयः यस्य, कराभ्यां उपरितनहस्ताभ्यां, अब्जं शङ्खं, चक्रं सुदर्शनमरिणं धृत्वा, हरेः विष्णोः भावं प्राधान्येन विष्ण्वात्मकत्वं प्रकटयति द्योतयति।

तथा च मध्यमाभ्यां कराभ्यामभयदं भीतिराहित्यदायिकां हस्तमुद्रां, त्रिशूलं तन्नामकमायुधं (त्रयाणां शूलानां समाहार इति), डमरुनामकं निनादवत्त्वादिविशिष्टं, दधानः दधत्, शम्भुत्वं शिवत्वं प्रकटयति।

अजपजपरतेः- न विद्यते जपः यस्मिन् संस्थाने सः, अजप एव जपः अजपजपः। तस्मिन् रतिः प्रीतिः तस्याः। प्रयत्नेन अजपतोऽपि यो जपस्सम्भवति महासिद्धस्येति। तदस्याः हेतोः, स्रक् अक्षमाला, कमण्डलुनि आपः जलपात्रस्थमम्बु। स्रक् च कमण्डल्वापश्चासां समाहारः स्रक्कमण्डल्वापः, ताः बिभ्रत् धारयमाणः वैधात्रं विधातुः ब्रह्मणः भावं, लक्ष्म चिह्न उच्चैरतिशयेन प्रकटयति द्योतयति, एवंरूपं तद्ब्रह्मण्यं भजेऽहम्।

## ➢ षट् चिह्नानि – भाव विकार निरासकानि

अ.व – दत्तस्वामिनः करेषु. षड्चिह्नदर्शनेन भावविकारनिरासनं प्रपञ्चयति।

**अध्यासाद् दृश्यमाना जगति जनिषु ये षड्भि भावा विकाराः**

**मायायाः कार्यभूता अनुभवकरणात् सत्यताभ्रान्तिकाराः।**

**षट् चिह्नै रीक्षितस्स न्नपगमयति तान् योऽविकार्यो विकारान्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।8**

द.प्र- जनिषु जीविषु अध्यासात् भ्रमकारणात्, मायायाः मूलकारणभूतायाः अविद्यायाः कार्यभूताः तेषामेव कारणात्, अनुभवकरणात्, तत्त्वज्ञानाभावेन निष्पन्नो मिथ्याऽनुभव एव करणम्। तस्मात् साधकतमात् करणात् हेतोः, सत्यतायाः पारमार्थिकसत्यत्वस्य भ्रान्तिकाराः भ्रान्तिं कुर्वाणाः, ये षट्भावविकाराः जाति- वृद्धि- विपरिणाम- अपक्षय- मृति- नाशरूपाः ये जगति लोके दृश्यमानाः वर्तन्ते, तान् विकारान् यः अविकार्यः विकृतिरहितः परमात्मा, षड्संख्याकैः करलक्षितैः लक्ष्मभिः (लक्षणेत्थंभूतेति तृतीया) ईक्षितः सन् भक्तै र्दृष्टस्सन्, अपगमयति पारमार्थिकसत्यं साक्षात्कृत्य दूरीकरोति, हि सत्यं, तद्रूपं तद्ब्रह्मण्यं भजेऽहम्।।

तमो निवारणेन रज्जौ दृष्टस्य सर्पभ्रमस्य निवारणमिव, षड्विह्नदर्शनेन षण्णां भावविकाराणां व्यावहारिकसत्यतामात्रत्वं ज्ञाप्यत इति भावः। अविकार्यस्य आत्मनः भावविकारप्रसक्तिर्न सङ्गच्छत इत्युत्तरमीमांसकानां सिद्धान्तः अत्रानुसन्धेयः।।

## ➢ दान फणितिः

**अ.व** - भगवतो दातृतां प्रकाशयति।

**आदातुं चेत् स दत्ते करयुगलमिदं नैव पर्याप्यते हि**

**निष्कामे बन्धमुक्तिं मुहुरपि सकलं कामितं चेत् सकामे।**

**किं ब्रूयासं घृणाधि र्वितरति महितं सच्चिदानन्दनं यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 9

**द.प्र –**

सः भगवान् दत्तः अनुग्रह बुद्ध्या वरान् प्रयच्छति चेत्, ग्रहीतुः भक्तस्येदं करयुगलं पाणिद्वयमिदं, आदातुं नैव पर्याप्यते हि, संपूर्णतया ग्रहीतुमशक्तं भवति हि।

भूरिदानस्य ग्रहणे प्रभूतस्य पात्रस्यापेक्ष्यमाणत्वात् सकलसंपत्तिग्रहणे भक्तस्य द्वारेण देवस्य महादातृभावः उत्प्रेक्षते। निष्कामे निरीहे वक्ष्यमाणविष्णुदत्तसदृशे भक्ते बन्धमुक्तिं संसारबन्धमोचनात्मकं अपवर्गं ददानः देवः, सकामे प्रवृत्तिमार्गस्थिते भक्ते सकलं कामितं सर्वमभीष्टं प्रयोजयति च इत्यध्याहारः। तस्य दातृप्रमुखस्य दानफणिति रीदृशीति किं ब्रूयासं? किं वदेयं? एतावद्दानादनन्तरं मुहुरपि पुनश्च वात्सल्यतामहितं अर्हणीयं सच्चिदानन्दनं सत्यचैतन्यात्मकं निरतिशयसुखं यः देवः घृणाधिः कृपालुः, घृणायाः धानं पोषणं, (उपसर्गे घोः किः) वितरयति विस्तारयति, तद्ब्रह्मण्यं भजेऽहम्।

- **मानस्वस्धान - अवधूतत्वम्**

अ.व- परमात्मजीवात्मनोः दातृप्रतिगृहीतृसंबन्धमुदीर्य, स्वरूपस्थितिसाधने अत्यन्तमुपकारकं देवस्य अवधूतलक्षणं निरूपयति।

**मान स्व स्थान जाया सुत पशु सदन स्वर्ग कीर्त्यादि लिप्सा-**

**बन्धानां भक्तकोट्याः पर मवधुवने ज्ञान वैराग्य कान्त्यै**[1]**।**

**योऽदीक्षिष्टाऽवधूतऽऽ श्श्रुतितति लतिका -धारतत्त्वप्रकाशः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 10

**द.प्र –**

यः देवः श्रुतिततिलतिकेति, श्रुतीनां वेदानां ततिः विस्तारः, ततीनां लतिकाः सूक्ष्मत्वाल्लतेव तन्व्यः उपनिषदः, तासामाधारः, तत्वस्य प्रकाशः यस्य सः, तथाविधः ब्रह्मात्मकः देवः भक्तकोट्याः भक्तानां कोट्याः असंख्याकानां भक्तानां, ज्ञानवैराग्यकान्त्यै ज्ञानस्य वैराग्यस्य च कामनायै, कमुकान्तिरिति धातोः ण्यन्तात् स्त्रियां क्तिन्, यद्वा कान्तिः प्रकाशः, ज्ञानवैराग्यभासायमान-स्याभिमानस्य सम्मानस्य वा, स्वस्यात्मीयानां

[1] कमु – कान्त्यै - इच्छा

धनादीनां वास्धानस्य राज्याधिकाराध्युपाधेः, जायायाः कलत्रस्य, सुतानां पुत्राणां पुत्रिकाणां वा, पशूनां द्विपदां मनुजानां चतुष्पदां जन्तूनां वा सदनानां वेश्मनां, स्वर्गस्य सुवर्गस्य कीर्त्यादिषु लोकान्तरोपलक्षितस्य ऐहिकामुष्मिकलोकख्यतेः, एवमादीनां कर्म भूतानां विषयाणां लिप्सा प्रेप्सा, ता एव बन्धाः, तेषां बन्धानां अवधुवने निष्कासनेनापगमने वा परमदीक्षिष्ट नितरां दीक्षितो बभूव, यः अवधूतः बन्धान्नीचैः धून्वानः भक्तान्तारयति, स्वरूपस्थितौ द्वैताभावादक्षरत्वादकारः, तद्गतस्थितौ वरणीयत्वाद्वरेण्य इति वकारः, संसारबन्धानां धावकत्वात् धूतसंसारबन्धन इति धूकारः, तत्वमसीत्यादिभिः उपनिषद्वाक्यैश्च लक्ष्यमाणत्वात् अवधूताभिधा भगवतः श्रुता, तथा च हेयत्वात्सर्वबन्धानां, स्वयमुत्सृज्य भक्तानामपि मोचकः यः दत्तात्रेयः तद्ब्रह्मण्यमुपास्महे।

### ➢ जगद्गुरुत्वम् (24 गुरवः)

अ.व - स्वरूपस्थितिमनुभवताऽपि भगवता लोकसंग्रहार्थमभिनीयमानां दृष्टान्ततां निरूपयितुं जगद्गुरुपदं व्याचष्टे।

**नम्रत्वाद् ज्ञान चिह्ना दिह गुरव इमे मे चतुर्विंशति र्यः**

**इत्यध्यारोप्य नूनं जगति च गुरुतां वस्तुजाते, महान्तम्।**

**अच्छाध्वानं जगद्गु - र्वितिनुत गरिमा काशयामास दीप्रं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदिसदयं सच्चिदानन्द दत्तम्।। 11**

**द.प्र-**

ज्ञानस्य चिह्नात्, आत्मनः परिपूर्णज्ञानस्य लक्ष्मणः नम्रत्वात् प्रह्वीभावात् हेतोः, मे मम, इहलोके इमे चतुर्विंशतिः वक्ष्यमाणाः चतुर्विंशतिगुरवः ज्ञानोपदेष्टारो भवन्तीति, जगति बाह्ये लोके वस्तुजाते चतुर्विंशतिषु वस्तुषु, गुरुतां गुरुभावमध्यारोप्य अधिकृतत्वेन समारोप्य, जगदेव मम गुरुरिति विनम्रतां प्रकटयन्, दीप्रं प्रकाशमानं महान्तं पूजनीयं

अच्छाध्वानं सुपथं, जगद्गुर्विंतिनुतमहिम- जगतः गुरुरिति नुतः गरिमा अस्येति, यः देवः काशयामास प्रख्यापयामास, तद्ब्रह्मण्यं भजेऽहम्।

तत्पुरुषसमाश्रयणाज्जगतो गुरुरिति, यस्संख्यायते सैषः ,वस्तुतस्तु जगदेवगुरुरिति भावयतीति बहुव्रीहिसमासाश्रयेन आत्मनो रहस्यमपह्नुत इति विशेषः।

## ➢ यदुराजोपदेशः

अ.व - जगद्गुरुत्त्व प्रतिपादनानन्तरं, उपलक्षणतया चतुर्विंशतिसंख्याकानां वस्तूनां देशिकत्वं बोधयितुं संप्रवृत्तं देवं मवधूतरूपेण प्रस्तौति।

**संसाराऽऽख्ये दवाग्नौ सकलजनगणे दह्यमानोपतप्ते**

**गङ्गाम्भो मग्न हस्ती-व नरप यदुनाऽदृश्यताऽऽत्म प्रशान्तः।**

**ज्ञानाम्भोधित्व हेतो र्मितिरहितमुदो मर्म संप्रार्थितं यत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 12

द.प्र –

संसाराख्ये संसारनामके दवाग्नौ दावानलेऽधिकरणे, सकलानां सर्वेषां जन्तूनां गणे सङ्घे, दह्यमानोपतप्ते[2] दह्यमाने तप्यमाने, उपतप्ते सन्निहितमृत्युच्छायेन रोगेण पीड्यमाने सति, गङ्गायाः जाह्नव्याः अम्भस्सु शीतजलेषु, मग्नः वप्रक्रीडया मज्जन्, हस्तीव गजसन्निभः सन्, नरप यदुना नरान्पातीति नरपः, नरपश्चासौ यदुश्च, यदुवंशमूलपुरुषेण यदुराजेन, अर्थात् राज्ञा यदुना आत्मप्रशान्तः, आत्मनि प्रशान्तः सर्वात्मभावे स्थितत्वात् प्रकर्षेण शान्तः. उपतापरहति इति भावः। यद्वा आत्मगुणैर्युक्तस्सन् प्रशान्तः, यः देवः अदृश्यत दृष्टः, गहनारण्ये नदीपुलिनेषु शयानः तरुणः दृष्ट इति पुराणगाथा।

---

[2] दह्यमानश्चैष उपतप्यमानश्च - दह्यमानोपतप्तः, विशेषणोभयपद कर्मधारयः।

तथा च ज्ञानाम्भोधित्व हेतोः, स्वात्मनः ज्ञानमेवाम्भोधिः जलधिः, तस्य भावः जलधित्वमिति हेतोः तन्निमित्तात्, मित्या परिमित्या च रहितायाः विरहितायाः मुदः निस्सीम्नः आनन्दस्य मर्म रहस्यं, यत् यस्मात् सम्प्रार्थितं अभ्यर्थितं चासीत् तद्ब्रह्मण्यमुपास्महे।।

## ➢ उपदेश वर्णनम्

अ.व - भगवता कृतं यदुराजोपदेशं वर्णयति।

**हेयोपाऽऽदेयभावाद् विषय गुण कृति द्रव्यमेतत् त्रिलोक्याः**

**स्वं स्वं पाठं प्रभिन्नं त्वनवरत मुदा- हृत्य संशिक्षयेत।**

**सूक्ष्मेक्षात स्समीक्ष्य प्रमुद मनुभव न्नस्म्यबोधीति येन**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्ददत्तम्।।**13

द.प्र-

त्रिलोक्यां, त्रयाणां लोकानां समाहारः त्रिलोकी[3], तस्यां त्रिषु लोकेषु। विषयगुणतृतिद्रव्यं गुणाश्च कृतयश्च गुणकृतयः, विषयभूताः गुणकृतयः यस्य तत् द्रव्यं सत्तात्मकं प्रति वस्तु, हेयोपादेयभावात् ग्राह्यत्याज्यात्मकत्वात्, प्रभिन्नं विभिन्नं, स्वं स्वं पाठं स्वीयं बोधं अनवरतं निरन्तरं उदाहृत्य प्रोच्य संशिक्षयेत्शिक्षयतैव।।

जगद्वस्तुजातं स्वभावेन गुणान् उपादेहि, दोषान जहीहि इति सदा बोधयतीति भावः। तां शिक्षां सूक्ष्मेक्षातः सूक्ष्मदृष्ट्या समीक्ष्य परिशील्य, तदाचरणेन प्रमुदं प्रमोदं अनुभवन्नस्मि, अनुभवामीति, येन भगवता यदुराजः अबोधि[4] बोधितवान्, तद्ब्रह्मण्यं भजेऽहम्।।

---

[3] अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत इति महाभाष्यकारेष्टिः, द्विगोश्च इति ङीप्।

[4] बुध अवगमने धातोः णिजन्तात् कर्मणि लुङि चिण् ।।

## ➢ पृथिवी

अ.व. – पूर्वोदाहृतान् चतुर्विंशतिं गुरून् जगदंशभूतान्, एकैकशो वर्णयितु मारभते।।

**आद्या गुर्वी म उर्वी प्रसहत इतरा ऽऽक्रम्यमाणा स्थिरा हि**

**वोढ्ढ्री धैर्यं, परार्था सकल जन कृते ह्यात्मसर्वस्वदाना।**

**पारार्थ्यं चान्वशिक्षे धृति मिति वदता ख्यापितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदिसदयं सच्चिदानन्द दत्तम्।। 14**

द.प्र –

आद्या गुर्वी[5] प्रथमा गुरुः, मे मम उर्वी। भूमिरेव गुर्वी भवति। सा इतरैः स्वेतरैराक्रम्यमाणा बहुधाऽऽक्रान्ता सत्यपि स्थिरा सुस्थिरा सती, धैर्यं धृतिं अर्थात् क्षमां, वोढ्ढ्री वहन्ती, प्रसहते। सर्वं चेष्टितं सहत एव।

सैषा भूदेवी परार्था परेषामर्थाः यस्याः सा, सकलजनकृते सकलानां समस्तानां जनानां जन्मवतां जन्तूनां कृते, आत्मसर्वस्वदाना आत्मनः सर्वस्वं, तस्य दानं यस्याः। सर्वस्वदाना हि वर्तते। हि तद्युक्तमेव।।

ततः तस्याः धरण्याः पारार्थ्यं परोपकारजीवनं, धृतिं क्षमाञ्च अहमन्वशिक्षे शिक्षितवानस्मि - इति वदता बोधयता, येन भगवता तत्त्वं जगद्गुरुतत्त्वं ख्यापितं प्रकथितम्, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ वायुः

अ.व – वायोः निस्संगत्वबोधं प्रतिपादयति, आस्ते इति।

---

[5] वोतोगुणवचनादिति वैकल्पिकः ङीप्।

**आस्ते वायु र्गुरु र्मे ऽखिल जग दुपकृ द्वस्तु संसर्गतो यः**

**गन्धं वोढाऽपि वृङ्क्ते प्रसृमर इह तद् दोषजालं गुणञ्च।**

**निस्सङ्गत्वं शिशिक्षे पर मिति गदता ख्यापितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 15

**द. प्र -** अखिलस्य सर्वस्य जगतः लोकस्य उपकृत्[6] उपकारको यः वायुः मारुतः, श्वसनेन प्राणिनामुपजीवकः। प्रसृमरः प्रकर्षेण सरणशीलः चलनस्वभावः, वस्तुनां गन्धवतामनेकेषां पदार्थानां संसर्गतः समस्पर्शात् गन्धं सुगन्धं दुर्गन्धं वा वोढाऽपि वहन्नपि, इह लोकेऽस्मिन्, तद्दोषजालं तेषां विषयाणां दोषस्य जालं समूहं, गुणञ्च वृङ्क्ते वर्जयति।

सः मे मम गुरुरास्ते भवति। एवं तस्माद्वायोः गुरोः निस्सङ्गत्वं सङ्गराहित्यगुणं परं आधिक्येनाहं शिशिक्षे, आकलयम् - इति गदता वदता, येन भगवता देवेन तत्त्वं, वायुगुरोस्तत्त्वं ख्यापितं बोधितं तद्ब्रह्मण्यमुपास्महे। निस्सङ्गत्वस्य पराकाष्ठा वायुव्रतनामधेयेन प्रशस्यत इति श्रुतिः, आस्य तं जनपदं पूर्वा कीर्ति र्गच्छतीति – तैत्तरीयब्राह्मणवचनात्।

## ➢ आकाशः

**अ.व** –

आत्मनः आनन्त्यमुपपादयितुं आकाशरूपं गुरुं वर्णयति, सर्वव्यापीति ।

---

[6] उपपूर्वकात् कृञः, क्विपि तुकि रूपम्।

**सर्वव्याप्यम्बरं वै घट मठ जठरै र्भिन्नता माप्य दृष्टं**

**वस्तुत्वाद् यद्विशालं मिति गति रहितं स्तोऽन्त आदि र्न यस्य।**

**आत्माऽऽनन्त्यं तथैवे त्यधिगतमिति यो वावदी त्यात्मरूपी**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 16**

**द.प्र** – व्याप्नोतीति व्यापि, सर्वस्य सर्वस्य अणोः व्यापि अम्बरं गगनं एकमेव सदपि, घटमठ जठरैः, घटेन, मठेन, जठरेण च परिच्छिन्नत्वात् भिन्नतां भिन्नत्वम्। घटाकाशः मठाकाशः जठराकाश इति विभिन्नव्यवहारताम्। आप्य दृष्टं व्यावहारिकसत्यत्वेन जनैरवगतम्। तथाऽपि वस्तुत्वात् परमार्थतः, विशालं विगताशाला यस्य तत्, परिच्छेदक कुड्य भित्त्यादि रहितं भवति।

यस्य आकाशस्य अन्तः आदिश्च न स्तः विद्येते, तदम्बरं एकवद्भावात्, मित्या मानेन, गत्या गमनेन प्राप्य प्रापकत्वभावेन च रहितं विरहितं विलसति। तस्मादाकाशगुरोः, आत्मनः स्वस्याऽऽनन्त्यं अपरिच्छेद्यत्वं अखण्डितत्वं वा, मयाऽधिगतं सुज्ञातमिति, यः आत्मरूपी परमात्मरूपी देवो वावदीति मुहुर्मुहुः वदति स्म, तद्ब्रह्मण्यमुपास्महे।

- **आपः**

अ.व –

अपां नैर्मल्यगुणोपदेशं प्रस्तौति, आप इति।

**आपो गुर्व्यो विभान्त्यो मम किल सदया स्स्वच्छ सत्त्वा अपीष्टाः**

**निर्वर्णा स्स्निग्ध रूपा विगलित रुचयो या रसाऽऽत्मान उक्ताः।**

**तद्व न्नैर्मल्य माप्या न्मुनि रिति भणता ख्यापितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 17

**द.प्र -** याः रसात्मानः रसः आत्मसु यासां ताः, रसरूपाः, उक्ताः छन्दोगानां उपनिषदि प्रोक्ताः। सदयाः तापप्रशमनद्वारा दयायुक्ताः, स्वच्छसत्त्वाः निर्मलप्रकृतयः, अपीष्टाः आधिक्येन जन्तुभिः काम्यमानाः, अपीत्युपसर्गः। निर्वर्णाः वर्णरहिताः, स्निग्धरूपाः शरीरस्य पोषणत्वात् सखिरूपाः, विभान्त्यः भासमानाः, विगलितरुचयः नीरुचयः, याः आपः जलराशयः, ताः मम मे गुर्व्यः गुरुत्वेन भाव्यन्ते। तद्वत् ता आप इव, मुनिः साधकः नैर्मल्यं मालिन्यरहितं विशुद्धत्वमिति आप्यात् प्राप्नुवीत - इति भणता वदता येन देवेन अब्गुरोः तत्त्वं ख्यापितं श्रावितं, तद्ब्रह्मण्यं भजेऽहम्।।

- **अग्निः**

अ.व – दोषाणां सर्वस्वं हरतोऽग्नेः पवित्रतामधिगच्छेदिति ब्रूते, सप्तार्चिरिति।

**सप्तार्चि स्सर्वभक्षो गुरुपद मपि मे स्वीकरो त्यच्छकाशः**

**तेजस्वित्वात् समस्तं ग्लपयति कलुषं दोषसर्वस्वनाशः।**

**तस्मात् तत्पावकत्वं समधिगत मिति ख्यापितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 18

**द.प्र -**

सप्त अर्चींषि, सप्तविधाः ज्वालाः जिह्वारूपेण श्रुताः यस्य सः। सर्वभक्षः सर्वं भक्षतीति। गुणदोषयुक्तानि सर्वाण्यप्यविवेचनेन भस्मसात्कृत्य पावयतीति, अच्छकाशः

अच्छः शुद्धः काशाः प्रकाशः यस्य। दोषाणां सर्वस्य नाशः यस्मात् यदीयधर्मात् तथाविधः। अग्निः, तेजस्वित्वात् आत्मनः अतिशयिततेजोवत्त्वात्, समस्तं कलुषं सर्वं मलीमसं, ग्लपयति अपाकरोति।

सः हुताशी मे गुरुपदं मदीयं गुरुस्थानं स्वीकरोत्युररीकरोति। आत्मनिष्ठस्य भूरिप्रकाशेन सर्वे दोषाः तिरोहिता भवन्तीति, तस्मादग्नेः तत्पावकत्वं, तत्प्रसिद्धशोधकलक्षणं समधिगतं संप्राप्तम - इति येन देवेन तत्त्वं अग्निगुरोस्तत्त्वं ख्यापितं बोधितं तद्ब्रह्मण्यं भजेऽहम्।।

- **चन्द्रः**

अ.व – देहस्यानित्यत्वं बोधयन् सोमोऽपि गुरुत्वं व्रजतीति वर्णयति, सोम इति।

**सोमोऽलञ्चक्र एतां मम गुरुपदवीं स्वीय वृद्धि क्षयाभ्यां**

**देह स्सर्वस्य जातिं मृति मपि वहति प्रस्थितो ह्येष मृत्युः।**

**दृश्यं नश्यं तदात्मा स्थिर इति सुलभं ख्यापितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 19

**द.प्र -**

मृत्युरेषः प्रस्थितः। नित्यं सन्निहितोमृत्युरिति, सर्वस्य सर्वस्य जन्तोः देहः शरीरमेव जातिं जननं मृतिं मरणमपि, वहति भरति। दृश्यं चक्षुरिन्द्रियगम्यं सर्वमपि नश्यं लयमेष्यति। तदात्मा तेषां जीविनामन्तर्वर्ति तच्छब्दवाच्यः प्रत्यगात्मैव स्थिरः अविनश्वरः - इति, स्वीयाभ्यां स्वकीयाभ्यां वृद्धिक्षयाभ्यां कलानामुपचयापचयहेतोः देहस्यानित्यत्वं बोधयन्, सोमः चन्द्रमाः ममैतां गुरुपदवीं गुरुस्थानत्वं अलञ्चक्रे अलञ्चकार - इति सुलभतया येन तत्त्वं ख्यापितं चन्द्रगुरुत्वं प्रपञ्चितं, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ सूर्यः

अ.व – नानाजीवोपहितस्याऽऽत्मनो दार्ष्टान्तिकत्वेन सूर्यमुदाहरति, आचार्य इति।

**आचार्यो भानु रीष्टेऽहनि विविधकरो यो दरीदृश्यमाणः**

**भाण्डे नद्यां तडागे सलिलधि झरगो भिन्नरूपोऽद्वय स्सन्।**

**नानाजीवस्थ आत्मा परि चिनु बहुधे - तीरितं येन तत्त्वं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 20

**द.प्र** – अहनि दिवा, विविधकरः सहस्रांशुः, अद्वयस्सन् एक एव सन्नपि, भाण्डे पात्रविशेषे, नद्यां सरिति, तडागे कासारे, झर -जलधिषु, झरेषु प्रस्रवणेषु जलधौ सागरे च, गच्छतीति गः। व्यस्तरूपोऽयं शब्दः।

अनेकेषु जलरूपोपाधिषु भिन्नरूपः बहुरूप इव दरीदृश्यमाणो वीक्ष्यमाणः, यः भानुः सूर्यः, सः ममाऽऽचार्यः गुरुः ईष्टे प्रभवति। एवमेव नित्यशुद्धबुद्धमुक्तपरिपूर्णः अनादिः अनन्तः स्वगत परगत भेदरहितः परंब्रह्मापरनामधेयः आत्मा, उदाहृत दृष्टान्ते सूर्य इव अनेकसंस्थानविशेषैः उपहितोऽपि, व्यवहारसत्यदृष्ट्या बहुविधः अध्यास्यत इति भावः।

नानाजीवस्थः बहुजीविषु कूटस्थः, आत्मा प्रत्यगात्मा, रविरिव साक्षिमात्रः अविकार्यः तिष्ठतीति, परिचिनु जानीहि - इति येन देवेन तत्त्वं बहुधेरितं अनेकधा कथितं तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ विहङ्गः

अ.व - मोहस्य दुःखकारकत्वं प्रतिष्ठापयन् जाललग्नं कपोतं दृष्टान्तयति।

**आस्ते पक्षीह देष्टा कलरव इह मे व्याधहेतु प्रमीतः**

**जाले लग्नां वधूं स्वां शिशुगण सहिता मीक्षिता[3] दुःखदष्टः।**

**मोहो दुःखाय क्लृप्तो भवतु विविदिषा चेतयेति ब्रुवाणं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 21**

**द.प्र –**

शिशुगणसहितां, शिशूनां शाबकानां गणेन समूहेन सहितां युक्तां, स्वां वधूं स्वकीयामपि सहचरीं भार्यां, जाले लग्नां निगृहीतां, ईक्षिता[7] आलोकयिता सन्न्, दुःखदष्टः दुःखेन शोकेन ग्रस्तः, मोहवशात् स्वयमपि जाले पतन्, व्याधहेतुप्रमीतः व्याधस्य निषादस्य हेतुना निमित्तेन प्रमीतः मृतः, कलरवः कश्चन कपोतः पक्षी विहङ्गः अपीह लोके मे मम देष्टा उपदेष्टा आस्ते बोधयति।

मोहः सङ्गव्या मोहः दुःखायैव आत्यन्तिकाय क्लेशायैव, क्लृप्तः प्रकल्पत इति तव विविदिषा वेत्तुं विवेक्तुमिच्छा सदाऽस्तु भवतु। अतः चेतय जागृहि, मोहबन्धात् जागृहीति ब्रुवाणं कलरवसंगृहीतं दोषवर्जनाऽऽत्मकं तत्त्वं वदन्तं तद्ब्रह्मण्यं दत्तं भजेऽहम्।।

- **समुद्रः**

अ.व – सागरात्संग्रहणीयं शान्तत्वादि बोधमवतारयति।

**यत्रासंख्येय रत्नाऽऽद्यगणित निधय स्सन्ति गम्भीर गर्भे**

**स्रोतोऽल्पं वाऽस्तु भूयः पुनरपि सरिता मेकरूपः प्रशान्तः।**

**गाम्भीर्यं शान्तताऽब्धे रवगत मिति य-स्सङ्गगादाद्वितीयः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 22**

---

[7] तृजन्त रूपं

**द.प्र –**

यत्र स्वकीये गम्भीरे गभीरे गर्भे उदरेऽसंख्येयान्यवर्णनीयानि रत्नादीनि प्रवालमौक्तिकवैदूर्यादीनि, इतरे चागणिताः अपरिमिताः निधयः स्नेहानिलादीन्धनादयः सन्ति वर्तन्ते। यत्र तु सरितां नदीनां, स्रोतः प्रवाहः ज्यायः अधिकः, पुनरपि कनीयः अल्पीयो वा भवतु, तथाऽपि सागरोऽयमेकरूपस्सन् प्रशान्त एव भवति। असंख्याकविभवानां दायित्वेपि स्वीयधनगाम्भीर्यं समुद्रो न प्रदर्शयति। तथा च स्रोतसां न्यूनाधिक्येपि स्थितप्रज्ञ इव समरूपी शान्त एव भवतीति भाव्यते।

एवमब्धेः समुद्रगुरोः गाम्भीर्यं गम्भीरता, शान्तता प्रशान्तिश्च मयाऽवगतं बुद्धमिति यः अद्वितीयः भगवान्देवः सङ्गगाद यदुराजाय प्रोवाच तद्ब्रह्मण्यं भजेऽहम्।।

- **अजगरः**

अ.व – अजगरेण शिक्षणीयं तृप्तिहेतुकं अकिञ्चनकरत्वं बोधयति।

**न्यूनं मृष्टं प्रभूतं यदुपगति मियाद् तेन दिष्ट्या सुतृप्तः**

**आहृत्यैवेह नूनं सुखमिव भविता वाहस[8] स्स व्रती सन्।**

**प्राप्ताऽऽहारेण तृप्तिं त्ववगमयति मा मित्यवोच न्महान् यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 23

द.प्र –

सः वाहसः कश्चन अजगरः, न्यूनं वा स्वल्पं वा, प्रभूतमधिकं वा, मृष्टं शुद्धं वाऽभ्यवहरणं, यदुपगतिमियात् यदुपलभ्येत तेन दिष्ट्या दैववशात् सुतृप्तः तृप्यन् आहृत्य, तत् खादित्वैव, इह गहने सुखमिव भविता सुखेन जीवतीति, अथवा आहारन्यूनतायामभावे वा व्रती सन् अनशनशीलस्सन् प्राप्ताऽऽहारेण लब्धाऽऽहारेण तृप्तिं

[8] अजगरः

प्रीतिं मामवगमयति मह्यं बोधयति, इति यो महान् यो महनीयो देवः अवोचत् अब्रवीत्, तद्ब्रह्मण्यं भजेऽहम्।।

## पतङ्गः(ಮಿಡತೆ)

अ.व – पतङ्ग इव कामोपतप्तो विनश्यतीति बोधयति।

**दृश्यं यद्यत् समस्तं कनक मपि महीं योषितं वाऽभिवाञ्छन्**

**नश्येत्कामै र्वितृण्णो ह्युपतपन गतो यः पतङ्गेन तुल्यः।**

**मा भाक्षं वाञ्छिताग्नौ तपन मिति पुरा बोधको योऽप्रमेयः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 24**

**द.प्र –**

यद्यत्समस्तं सर्वं, दृश्यमिन्द्रियगम्यं विषयादिकं, कनकमर्घ्यपदार्थोपलक्षितं हिरण्यं, महीं भूमिं राज्यं क्षेत्रादिकं वा, योषितः स्त्रियो वा। स्त्रीपुंसयोरुपलक्षकमेतद्योषिच्छब्दः। अभिवाञ्छन् कामयमानः यः नरः, सः पतङ्गेन तुल्यस्सन् शलभसन्निभः कामैः वाञ्छाभिः वितृण्णः हिंसितः पीडितः, एतं लभेय, इतः परँ लभेयेति नित्यं विनष्टचित्तप्रशमनः, उपतपनगतस्सन्न् आधिं व्याधिञ्च प्राप्नुवानः नश्येत् विनश्येत्। एवं पतङ्गस्य दृष्टान्तं संगृहीत्य, वाञ्छिताग्नौ कामानले तपनं तप्यमानत्वं मा भाक्षं न भजेयम्, इति पुरा पूर्वकालादेव बोधकः उपदेशकः, अप्रमेयः प्रमाणादिभिरगम्यो यो देवः चकास्ति, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ भ्रमरः

अ.व – भ्रमररूपाद्गुरोः पाठद्वयं बोद्धव्यमिति श्लोकद्वयेन प्रतिपादयति।

**भूयोऽल्पेभ्य स्सुमेभ्यो मधु चयन मसौ यद् द्विरेफः प्रकुर्यात्**

**शास्त्र ग्रन्थेभ्य एवं रस मिह चिनुयात् क्वापि नोपेक्षिषीष्ट।**

**शस्तं ग्राह्यं समस्ता दिति मधुकरतो ऽग्राहि चेति ब्रुवाणं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 25**

द.प्र –

अल्पेभ्यः कनीयगात्रेभ्यः पेशलप्रकृतिभ्यः इति वा, सुमेभ्यः पुष्पेभ्य एव, मधुनः मकरन्दस्य चयनं संपादनमसौ द्विरेफः भ्रमरः, भूयः अधिकं, यत्प्रकुर्यात् यद्विदधीत, एवं शास्त्रग्रन्थेभ्यः विविधविज्ञानसंपन्नेभ्यः प्रकरणग्रन्थेभ्यः, रसं सारं साधकः चिनुयात्। इह तत्त्वविचिकित्सायां निमित्ते संगृह्णीयात्। यथा भ्रमरः सर्वाणि कुसुमानि स्पृशति, तथैव सर्वान् विषयानालोडयेदिति भावः।

क्वापि कुत्रचिदपि ग्रन्थे प्रतिपाद्यं विषयं, नोपेक्षिषीष्ट न अवगणयेत्। समस्तात् ग्रन्थजातात् शस्तं प्रशस्यमानं, ग्राह्यमिति उपादेयमिति, मधुकरतः भ्रमररूपगुरोः, अग्राहि मयाऽग्राहि, स्वीकृतं चेति ब्रुवाणं वदन्तं तद्ब्रह्मण्यं भजेऽहम्।

अ.व – संपादनप्रकारमवबोध्य लोभान्निवर्तयेदिति जागरयति।

**एकाहे भोक्ष्यमाणं त्वल मधिक मपि क्षायय त्यस्तु चित्तिः**

**सम्पत्तिं लोभहेतुं त्वनु[9] मरण मत स्सावधानो भवे र्भोः।**

**एतौ पाठौ बुबोध भ्रमर गुरुवरा - दित्थ मूचे प्रभु र्यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 26**

---

[9] अनु र्लक्षणे (हेतौ वर्तते) कर्मप्रवचनीयः।

द.प्र –

एकाहे एकस्मिन्नहनि, भोक्ष्यमाणं भोग्यं वस्तु, अलं पर्याप्तं भवति। अधिकमपि तु अपेक्षितादधिकन्तु, क्षाययति समूलं नाशयति- इति चित्तिरस्तु भवते ज्ञानं भूयात्। लोभहेतुं संपत्तिं लोभस्य हेतुभूतमैश्वर्यं, धनकनकवस्तुवाहनादिकसंपादनमनु अनुसृत्य, तद्धेतुकं मरणं निधनमपि भवति। कर्मप्रवचनीयः अनुर्हेतौ वर्त्तते।

भोस्साधकवर्य, अतः अस्मात्कारणात् सावधानो भवेः, लोभात् जागरूको भूयाः इति च शिक्षितम्। एतौ पाठौ सर्वगुणग्राहिताऽलुब्धताचेति पाठद्वयं, भ्रमरगुरुवरात् अध्यवसितगुरोः श्रेष्ठाद्भ्रमरात् दृष्टान्तद्वारा बुबोध अहमबुध्ये। इत्थमेवं रीत्या यः प्रभुः अधिगतपाठानुष्ठाने समर्थः ऊचे अवोचत्, तद्ब्रह्मण्यं भजेऽहम्।

- **गजः**

अ.व – स्त्रीसङ्गस्य सर्वथा वर्जनीयत्वं गजदृष्टान्तेन बोधयति।

**सर्वान् दोषा नतीयात् सुलभ मतिमनाः[10] कामिनीकामना या**

**तद्विद्ध स्सन् प्रमत्तः प्रबलकरिवरो बन्धतामेति मोहात्।**

**योषिद्वर्ज्या प्रतीकेत्यपि हि परमता माप्तुकामे य ऊचे**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 27

द.प्र- कामिनीषु योषितां विषये कामना वाञ्छा या वर्तते, सा कामना, अतिमनाः अतिक्रान्ता मनः[11], कामतीव्रत्वात् मानसमतिक्रान्ता सती, सर्वान्दोषान् सकलानितरदोषान्, सुलभमतीयात् सुलभतयाऽतिगच्छति।

[10] (27 श्लेके अतिमनाः इति कामना शब्द विशेषणम्)

[11] अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति प्रादि समासः।

पौलस्त्य रावणवदधीतविद्योऽपि तापसः, स्त्रीसङ्गव्यामोहेन नीचत्वमापद्यत इति सर्वदोषमूर्धन्यत्वं स्त्रीसङ्गवाञ्छायाः उपपद्यत एव। तद्विद्धः तया स्त्रीकामनया विद्धस्सन् ताडितस्सन्, मोहाद्व्यामोहवशात् प्रमत्तः माद्यन्, प्रबलः अतिबलः करिवरः गजराजोऽपि बन्धतामेति बद्धो भवति। हस्तिपकाः मदगजान्निग्रहीतुकामाः (निजिघृक्षवः), प्रतीकां करिण्या आकृतिं प्रदर्शयन्तः, आकृष्य गजमवटे पातयन्ति स्मेति प्रसिद्धि र्वर्तत एव।

अतः परमतां महत्त्वमाप्तुकामेन प्रेप्सुना प्रतीका योषिदपि वर्ज्या। स्त्रीणां चित्रप्रतिमादिकादपि मानसं निवर्तनीयमिति येन देवेन बुद्धं ज्ञातं तद्ब्रह्मण्यं भजेऽहम्।

- **मधुहरः**

अ.व - मधुहरमुदाहरन् लोभाद्धेतो स्समूलं वित्तं नश्यतीति बोधयति।

**मह्यं त्वेत न्मदीया जनतति रिति या लुभ्यता सञ्चिता श्रीः**

**तत्सर्वा हार्यते वै मधुहर सदृशै श्चौर राजाऽऽदिभि र्द्राक्।**

**लोभो नाशाय कल्प्ते त्यनुपद मपि मे बुद्धि रासे त्यवादीत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 28

**द.प्र-** जनानां ततिः बन्धूनां निवहः, मदीया मामकीना इति, मोहात् दृश्यमानमेतत्तु मह्यमेव मदर्थमेवास्तु, इति प्रकारेण लुभ्यता कृपणेन या श्रीः सम्पत्तिः सञ्चिता भवति समचायि। तत्सर्वं मधुहरसदृशैः मधुमक्षिकाः संहृत्य मकरन्दहरैः अथवा तत्तुल्यैः चौरराजादिभिः चौरै राजभिः यद्वा तदितरैः बलवद्भिः पुरुषैः, द्राक् शीघ्रमेव, ऐश्वर्यकांक्षैः हार्यते अनुचरैः कररूपेण चोर्यते मोष्यते।

लोभः सर्ववस्तुस्वीकरणे बुद्धिः, नाशाय विनाशाय, कल्प्ता कल्पत इति मे बुद्धिः निश्चयात्मिका धिषणा अनुपदं झटिति आस अभूदिति, यः देवः आवादीत् अवोचत्, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ हरिणः

अ.व – ग्राम्यसंगीतादिषु दोषं संसूचयति हरिणानां दृष्टान्तात्।

**शब्दाऽऽकृष्टाः प्रणद्धाः किल हरिणगणा वेगवन्तोऽपि तस्मात्**

**ग्राम्यं गीत्यादि सर्वं भगव दितरगं मादयेद् बुद्धिशक्तिम्।**

**स्वान्तं वार्यं मुमुक्षो रमुक विषयतः पाठ मित्थं प्रवक्ता**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 29

**द.प्र –**

हरिणगणाः मृगाणां यूथाः, वेगवन्तोऽपि शीघ्रगतिशीला अपि, शब्देनाऽऽकृष्टाः मधुरगीत्यादिभिः श्रोत्रेन्द्रयार्थैः विषयैराकृष्टास्सन्तः, प्रणद्धाः निषादैः जालेषु निर्बद्धा भवन्ति हि। तस्मात् तस्माद्धेतोः भगवदितरगं भगवतः इतरस्मिन्विषये सङ्गच्छमानं सङ्गतं सर्वं समस्तं, ग्राम्यं जानपदं गीत्यादि राजाश्रयादि संपादितं गाननर्तनादिकं, बुद्धिशक्तिं सदसद्विवेचनसामर्थ्यं, मादयेत् कुण्ठयेत्। तस्मादमुष्माद्विषयतः दूषितप्रसंगात्, मुमुक्षोः मोक्षकामस्य, स्वान्तं मनः, वार्यं निरोद्धव्यम्। इत्थं एवंविधं पाठं बोधं यो देवः प्रवक्ता प्रब्रूते, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ मीनः

अ.व – जिह्वेन्द्रियमूलकमुपद्रवं बोधयितुं मत्स्यदृष्टान्ते प्रवर्तते।

**आचार्यो मीन मूर्ति र्भवति च बडिशै र्मृत्यु मापद्य दुःखं**

**जिह्वा चापल्य हेतो रस रति वशगो बोधयामास नश्यन्।**

**आहारे वाचि जाग्रत् कुशल मपि सुखं प्राप्नुवीतेत्यवोचत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 30

द.प्र – रसरतिवशगः, रसे रतिः रसरतिः, तस्याः वशं गच्छतीति, जिह्वाचापल्यहेतोः रसनायाः चाञ्चल्यस्य हेतोः निमित्तादजागृतस्सन्, बडिशैः आहारच्छलेन मीनाकर्षकैरायुधैः, दुःखं शोकरूपं, मृत्युं मरणमापद्य तदवस्थां प्राप्य नश्यन् लुप्यन्, नियमाभावेन नित्यभोजन लोलुपः मीनमूर्तिः मत्स्यस्याऽऽकारः कलेबरो वा ममाऽऽचार्यो भवति गुरुश्च भवति।

पूर्वोदाहृतबोधाचरणदक्षः पुरुषः, आहारेऽभ्यवहारे, वाचि वाक्प्रयोगे तद्यमने च, जाग्रत् जागरूकः, कुशलं श्रेयः सुखमपि ऐहिकसौख्यञ्च, प्राप्नुवीत लभेत, इति यः देवः अवोचत् अब्रवीत् तद्ब्रह्मण्यं भजेऽहम्।

## ➢ पिङ्गला – गणिका (वेश्या)

अ.व – ऐकान्तिकमानन्दमनुभवन्तीं काञ्चन गणिकामुदाहरन् विरतेर्लाभ मुद्बोधयति।

**वेश्या काचिद् गुरु र्मे विट सुख विरता पिङ्गला प्रेक्षमाणा**

**आत्म न्येवास्ति नन्दो बहि रिति तु मृषा वित्तवेद्या च धन्या।**

**एकान्ताऽऽनन्द इत्थं विदित इति मया बोधको यः प्रदेष्टा**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 31

**द.प्र – पिङ्गला तन्नामिका काचिद् वेश्या गणिका स्त्रीः, प्रेक्षमाणा सरसान् नायकान् प्रतीक्षमाणा, तदलाभेन नैराश्यात् चिन्तयन्ती, विटसुखविरता - विटेभ्यः प्राप्स्यमान सुखे मोदे विरताऽनासक्ता बभूव। एवं ध्यायन्ती सा, नन्दः अखण्डानन्दः, आत्मन्येवास्ति सर्वव्यापिनि मय्येवास्ति, बहिः बाह्यवस्तूद्भवः आनन्द इति भावो मृषा हि असत्यं हि, इति निश्चित्य, वित्तवेद्या वित्तं विदितं वेद्यमात्मज्ञानं यया, सा धन्या चाभूत्। बहिर्विषयकं सुखमनित्यमिति सञ्चित्य, निदिध्यासनेन विनिश्चित्य, स्वात्मविज्ञानसुखवती सञ्जातेति भावः।**

इत्थं एवंरीत्या तन्निदर्शनात्, एकान्ताऽऽनन्दः एकान्तसाध्य आनन्दः सुखं, मया विदितः विज्ञात इति यः प्रदेष्टा गुरुः बोधकः बोधयति, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ वर्तिका (अल्पीयान् पक्षिविशेषः)

अ.व – द्रव्यग्रहणं दुःखं प्रयोजयति, त्यागो हि सुखहेतुर्भवतीति शकुनिका दृष्टान्तेन विशदयति।

**त्रस्ता श्येनैः प्रकामं नभसि च दलिता वर्तिका क्रव्य खण्डे**[12]

**बीजं दुःखस्य हित्वा सुख मनुपद मैन्मुख्य पाठ न्त्वबोधीत्।**

**त्याग स्सौख्याय कल्प्ता**[7] **ग्रहण मतिशुचे बुद्धि रग्राहि येन**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 32

**द.प्र –**

क्रव्यखण्डे मांसशकले, तन्निमित्ते, चर्मणि द्वीपिनं हन्तीतिवत् निमित्तसप्तम्येषा, नभसि गगने, श्येनैः गृध्रैः, प्रकाममत्यन्तं, त्रस्ता तर्जिता, दलिता च क्षतगात्रा च, वर्तिका काचन कुररपक्षी, दुःखस्य बीजं शोककारणं, मांसखण्डं हित्वा त्यक्त्वा स्वैरमडयत। एवमनुपदं शीघ्रमेव सुखमैत् सौख्यं प्राप्तवत्यासीत्।

मुख्यपाठं शोकेनोद्विग्नः पुरुषः, तदीयस्य शोकस्य हेतुमन्विष्य विवेकेन दुःखबीजमुज्झेदिति मुख्यं पाठं, अर्थात् सर्वशोकदूरीकरणनिमित्तमुपाय मबोधीत् सा व्यजानात्।

तदुदन्तमुद्वीक्ष्य त्यागः विषयपरित्यागः, सौख्याय कल्प्ता कल्पते, ग्रहणं वस्तुसंग्रहण मतिशुचे अत्यन्तशोकाय तत्कृतरोगाय च कल्पत इति बुद्धिः ज्ञानं, येन देवेन अग्राहि, तद्ब्रह्मण्यं भजेऽहम्।

---

[12] विषय सप्तमी (चर्मणि द्वीपिनं हन्ति।) वत्। कल्प्ता - लुटि च क्लृपः (अनिट्)।

## ➢ शिशुः

अ.व – चितासदृश्या चिन्तया विहीनं शिशु माचार्यत्वेन सम्भावयति।

**आचार्यं मेऽपि मन्वे स्तनप मह ममुं शून्यचिन्तं प्रशान्तम्**

**आनन्दाब्धौ निमग्नं विधि गुण रहितं योगिवर्याऽऽस्पदाप्तम्।**

**चिन्ता मुष्णाति नूनं सुख मिति विदितं यो भणत्याप्तकामः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 33

**द.प्र -**

शून्यचिन्तं शून्या चिन्ता यस्य सः, चिन्ताविहीनमिति यावत्। प्रशान्तमुद्वेगरहितं, आनन्दाब्धौ आनन्दस्य सागरे निमग्नमवगाहमानं, विधिगुणरहितं किं करणीयं किमकरणीयमिति विधिना वा, तद्गुणेन वा विरहितम्। अकिञ्चनकर्तव्यतया सुखं शयानमिति भावः।

योगिवर्यः योगिनां श्रेष्ठः। तस्यास्पदं स्थान माप्तं प्राप्तवन्तम्। योगिवर्यास्पदाप्तम्[13]। योगिपुङ्गव लक्षण-कर्म-फल-सादृश्येनोपमेयं अमुं स्तनपं स्तनन्धयं शिशुमप्यहमाचार्यं गुरुं मन्ये भावयामि। तद्दर्शनेन चिन्ता शोकः सुखमानन्दं नूनं मुष्णात्यपनयतीति मया विदितम्, इति यः आप्तकामः आप्ताः सर्वे कामाः अनेन, देवः भणति ब्रवीति, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ कन्यका

अ.व – तापसयोग्यतायाः निस्सङ्गत्वं, प्रथममावेदयतुं वधूटीमुदाहरति।

[13] द्वितीयाश्रितातीत ... इति द्वितीया तत्पुरुष समासः।

**बोद्ध्री कन्या यवाना मवहनन रता हस्तभूषां ध्वनन्त्योः**

**निष्कास्यैका मशब्दा, बहुषु कलहता भाषणं च द्वयोर्वा।**

**एकान्त न्तूत्तमं स्यात् तपसि किल ततो ऽज्ञायि येनोक्त मस्याः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 34**

द.प्र- पूर्वं कदाचित्, भावि श्वशुरादि बन्धुषूपस्थितेषु गृहकार्यनियुक्ता काचन कन्या, यवानां धान्यानामवहननरता, अवहननरता अवहनने कर्मणि रता मुसलेन साधनेन वितुषीकरणे सक्ता, ध्वनन्त्योः शब्दायमानयोरेकां हस्तभूषां कङ्कण मेकं निष्कास्यापनीय, अशब्दा कङ्कणध्वानविमुखत्वेन निश्शब्दा भवन्ती, मम बोद्ध्री बोधयित्री बभूव। अन्तर्भावित्य णिजत्र समुन्नोयः।

अन्तर्गृहकार्याणां पचनादिसम्बन्धिनां शब्दादिकं बहिरुपविष्टैः यथा न श्रूयेत, तथा प्रयतन्ते नारीजन इत्यनुभवसिद्धमेव। तदनुरोधेन विहितचेष्टायाः परिणेष्यमानायाः कन्यकायाः हस्तालङ्कृत-कङ्कणानामुदन्तं पश्यता मया, तापसोपयुक्तः बोधः सम्प्राप्त इति भावः।

तपसि तपस्याविषये बहुषु सत्सु, बहुषु जनेषु सत्सु, कलहता विवादभावः, द्वयोस्तु सतोः भाषणं वृथाप्रलापः स्यात् सम्भवेत्। एकस्तपो, द्विरध्याय इति लोकश्रुतिरप्यत्र घटते। अतः तपस्याया उपकारकेषु उत्तममेकान्तमेवेति, अस्याः कन्यकायाः हेतोर्मया अज्ञायि विज्ञातमिति, येन देवेनोक्तं बोधितं तद्ब्रह्मण्यं भजेऽहम्।

## ➢ शरकारः

अ.व - एकाग्रतां बोधयितुं शरकारं निदर्शयति।

**पूर्वं रथ्या निषण्ण श्शरकृ दिह महा राज यात्राऽनभिज्ञः**

**व्यावृत्त्य स्वं मनो य-स्सकल विषयत श्चैकधी रास सोऽपि।**

**देष्टैकाग्र्यं ततोऽहं मनस उपरतिं बोधितोऽस्म्याह योऽसौ**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 35

द.प्र – पूर्वं प्राक्तने काले रथ्यानिषण्णः रथ्यायां राजमार्गे निषण्णः अवस्थितः, शरकृत्, कश्चन शरकारः लोहेन इष्वाद्यायुधान् कुर्वाणः, महाराजस्य यात्रायाः भूरिमहोत्सवयात्रायाः अनभिज्ञः कोलाहलमनभिजानानः, सकलविषयतः सकलेभ्यः विषयेभ्यः स्वं स्वीयं मनः चित्तं, व्यावृत्य निवर्तयन्, इह शरकरणे एकधीः केवला धीः यस्य, विकल्परहितस्सन् यः आस आसीत्, सोऽपि मह्यमैकाग्र्यं, एकाग्रतायाः परां काष्ठां, देष्टोपदेष्टा देशिकः बभूव, ततः तेन शरकारेण हेतुनाऽहं, मनसः उपरतिं मानस नियन्त्रणं बोधितः अस्मीति, योऽसौ गुरूत्तमः आह ब्रूते, तद्ब्रह्मण्यं भजेऽहम्।

ततः इति तृतीयाविभक्त्यर्थे तसि प्रत्ययः। पञ्चमी विभक्त्यर्थे प्रसिद्धस्यापि तसेः, सर्वविभक्तिषूपसङ्ख्यान मिति वार्तिकबलादिह तृतीयायां प्रयुक्तिः।

- **सर्पः**

अ.व – बृहतः निवासगृहस्य निर्माणं, तन्निर्वहणादिकं तापसस्यायुक्तमिति सर्पमुदाहरति।

**वल्मीके चोपदीका विरचित सदने स्वीयता माप्य भोगी**

**देहोऽनित्यो ध्रुवं तत् किमिह तदवने गेहनिर्माण कार्यम्?**

**आपातान्तं कथञ्चि न्निवस च सदने मेति[14] पाठं य आह**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 36

---

[14] ((मा, इति)

**द.प्र** – भोगी फणी, उपदीकाभिः क्षुद्रक्रिमिभिः कीटैः, विरचिते निर्मिते सदने निवासे वल्मीके, स्वीयतां स्वकीयतामाप्य सम्भाव्य निवसति। यद्यप्यवशिष्टेन जन्तुजातेन निवासकल्पने यत्नो विधीयते, परन्तु फणी तादृशप्रयतनविरहितः कथञ्चिदपि यत्र क्वापि देहयात्रां निर्वहतीति रूढिः।

देहः अनित्यः शरीरमशाश्वतं, तद्ध्रुवं तदेव सत्यम्। तदवने देहस्य संरक्षणे निमित्ते, किमिह गेहस्य निर्माणमपि कार्यं, चिन्त्यताम्। अशाश्वतस्य देहस्य शाश्वतिकत्वमनुमीय, भ्रमेण निश्चित्य च शरीरसौख्यकल्पनेच्छया बृहद्भवनं निर्माय, शाश्वतं कर्म कृतमिति यत तृप्यते तदयुक्तमिति भावः।

आपातान्तं देहावसानपर्यन्तं, कथञ्चित् सुखदुःखानपेक्षं यथा लब्धावकाशं, निवस निवासं कुरुष्व, सदने एकस्मिन्नेव गृहे, स्वीयबुध्या ममकार व्यामोहेन मा वात्सीः इति यः पाठमाह, सर्पोदाहृतं बोधमावेदयति, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ ऊर्णनाभिः(नाभः)

अ.व - जगदुत्पत्तिस्थितिलयान् सोदाहरणं प्रचोदयितुं, तद्द्वारेण अनिर्वचनीय वैचित्रीं ब्रह्मणः प्रतिपादयितुञ्च तन्तुवायं दृष्टान्तयति।

**जालं निर्माय चित्रं चिरतरमपि य-स्तूर्णनाभि स्तथैव**

**सर्वं सर्गं विधत्ते तमुप रमयति स्वैर कर्मा परेशः।**

**स्मारं स्मारं तदीयात् कृतिहरणविधे र्बोधितोऽस्मीति वक्ता**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 37

**द.प्र-**

चित्रं वैविध्येन पूर्णं, जालं तन्तुनिर्मितमानायं, निर्माय विरच्य, यस्तूर्णनाभिः मर्कटकः उपरमयति विलापयति, तथैव स्वैरकर्मा स्वेच्छाचारः, परेशः परमेश्वरः सर्वं सर्गं सर्वां सृष्टिं कृत्वा, विधत्ते धारयति, पोषयति, तमुपरमयति च कल्पान्ते विनाशयतीति भावः।

एवं तदीयान् कृतिहरणविधेः लूतायाः निर्माण संहार कार्यात् हेतोः परमात्मकर्तृकं जगदुत्पत्ति विपत्तिकर्म, अर्थात् जगदनित्यतवं स्मारं स्मारं स्मरन् स्मरन्न बोधितोऽस्मीति, यो वक्ता वदति, तद्ब्रह्मण्यं भजेऽहम्।

- **कीटः**

अ.व-

भ्रमरकीटन्यायमनुसृत्य अनैन्तिकव्यापारविवर्जितः भगवद्ध्यानमग्नः सारूप्यनामकं तार्तीयीकं मोक्षविशेषं लब्धुमर्हतीति प्रपञ्चयति।

**पेशस्कृद्ध्यान मग्न स्त्वनितर धिषण स्तत्समानं शरीरं**

**यश्चाऽऽपत् कीटकोऽयं भगवदनुभवे शुद्ध दृष्टान्त भूतः।**

**तीव्रैकाग्र्य प्रबोधात् स च गुरु रिति यो वावदी त्यत्रिपुत्रः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 38

द.प्र -

पेशस्कृतः भ्रमरस्य ध्याने मग्नः, अनितरधिषणः न विद्यते इतरा धिषणा बुद्धिः यस्य स कीटकः, तत्समानं तेन द्विरेफेण तुल्यं शरीरं रूपमापत् अलभत। सोऽयं भगवदनुभवे परमात्मनः सगुणब्रह्मणः अनुभवे, शुद्धदृष्टान्तभूतः स्वच्छनिदर्शनत्वेन स्थितो भवति। स च कीटकः तीव्रैकाग्र्य प्रबोधात् अव्यावर्त्यमतेः प्रबोधनात्, मम गुरुः भवतीति योऽत्रिपुत्रः दत्तात्रेयो वावदीति पौनःपुन्येन प्रबोधयति, तद्ब्रह्मण्यं भजेऽहम्।

**अ.व -** एवं चतुर्विंशति संख्याकान् गुरुबोधान् सङ्गाह्य यदुराजोपदेशमुपसंहरति।।

**सर्वं वस्तु प्रशस्तं वदति हि महितं सर्वदा पाठ मेकं**

**एवं प्राप्तां सुविद्यां कलयति नितरां नित्य रोमन्थवद्यः।**

**सत्य ज्ञानं ददौ द्राङ्-निरवधि यदवे पक्वचित्ताय देष्टा**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 39

**द.प्र –**

लोके सर्वं वस्तु प्रशस्तं प्रशस्यते। वैयर्थ्यापत्तिः न कस्यचिद्भवति। तथा च प्रति वस्तु सर्वदा एकं महित मर्हणीयं पाठं वदति हि ब्रवीतीति एतावता निरूपणेन प्रसिध्यति खलु।

एवं जगद्गुरुबोधेन प्राप्तां सम्पादितां सुविद्यां सुष्ठु ज्ञानं नित्यरोमन्थवत् यः कलयति सदा आम्नाति, यश्च निरवधि निस्सीम सत्यज्ञानं पारमार्थिकं त्रिकालाबाध्यविज्ञानं पक्वचित्ताय ज्ञानग्रहणे परिणतमनस्काय यदवे यदुराजाय द्राक् तूर्णं देष्टा यः उपदिदेश, तद्ब्रह्मण्यं भजेऽहम्।।

श्रवणमात्रेण विज्ञानमाप्तुं न शक्यत इति, मनन निदिध्यासनयोः स्मारणाय प्रयुक्तं रोमन्थनमुपदेष्टुं, मनन निदिध्यासनपरायण आचार्य एव अर्हतीति बोधयति। अनेनैव प्रयोगेणौपदेशिकवाक्यस्य, **अधीहि भो भगवः**, इत्यस्य सामर्थ्यं व्यज्यते। स्वयमधीयानः उपदिश्यमानज्ञानं आकलयन्नेव, शिष्येभ्यः गुरुः विदं प्रदत्त इत्यनुभवसिद्धमेव हि विदुषाम्।।

## ➢ सरोवरे तपः

अ.व - यदुराजमूलकमवधूतगीतं, प्रशस्त्यं तत्त्वं, विशदीकृत्य देवस्य चित्रं तपश्चर्यं विवृणोति।

**शिष्या स्ते स्याम देवे-त्यनिश मनुसर- न्मौनियूनां तु दीक्षां**

**संप्रेक्षेयेति खातं सपदि किल विशन् दिव्य वर्षा नतीत्य।**

**योग्यत्वाऽऽप्त्यै प्रतीक्षा मुपदिशति विभुः कारणं योऽत्रिसूनुः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 40**

**द.प्र –**

हे देव- ते तव शिष्या अन्तेवासिनो भूयास्म। अस्मद्गुरुत्व मुरीकुरुष्व- इत्यनिशमभीक्ष्णं अनुसरतां मौनियूनाम् मुनिकुमारकाणां, दीक्षामभिनिवेशं, संप्रेक्षेय परीक्षां कुर्यामिति निश्चित्य, सपदि तूर्णं खातं कासारं विशन् निविशमानः जलस्तम्भनविद्यया तपोयुक्तस्सन्, दिव्यान् वर्षान् मानुषसंवत्सरापेक्षया बहुगुणितान् हायनानतीत्य, यः अत्रिसूनुः दत्तदेवः विभुः योग्यत्वस्याप्त्यै शिष्यार्हतामाप्तुं प्रतीक्षां कारणं, प्रतीक्षामिति कारणं य उपदिशति, तद् ब्रह्मण्यं भजेऽहम्।।

## ➢ मुनिजन परीक्षा

अ.व - वासनाबलेन स्वकीयदोषा न्दर्शनिभे गुरौ पश्यन्, शिष्यकृतार्थतां नोपयतेति प्रदर्शयितुं देवकर्तृकां प्रप्रथमां परीक्षां वर्णयति।।

**स्वान्तस्था दोषपङ्का यदि न परिहृता स्सुप्रतीक्षा मुधा[15] स्यात्**

**इत्येवं दर्शनार्थं सहरसवनिता सङ्गलग्न स्सुदृष्टः।**

**शाक्तैश्वर्यं मयीति प्रकटितमहिमा योऽच्छसौन्दर्यकन्दः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 41**

---

[15] मृधा,, 42 श्लोके येन इत्यस्य आवृत्तिः, अजादेः आकृतिगणत्वात् टाप्।

**द.प्र –** स्वान्तस्थाः, स्वान्ते तिष्ठन्तीति स्वान्तस्थाः मानसिकाः, दोषपङ्काः कर्दमनिभाः दोषाः, यदि न परिहृताः न परिह्रियन्ते चेत्, सुप्रतीक्षा सदाशयनेनैव कृता प्रतीक्षा, मुधा स्यात् वृथा एव भवेदिति दर्शनार्थं निरूपणाय, प्रतीक्षमाणानां मुनियूनामनुग्रहणात् प्राक् पुनः परीक्षितुं, सहरसवनितासङ्गलग्नः शृङ्गाररसेन सह वर्तत इति सहरसा, सा च वनिता च सहरस वनिता, सरसयोषित्, तस्याः सङ्गे लग्नः, तयाऽऽश्लिष्टस्सन्, सुदृष्टः तीरस्थितैः युवभिः स्पष्टं दृष्टः, अच्छसौन्दर्यकन्दः स्वच्छस्य सौन्दर्यस्य मूलभूतः शारीरिकमनोज्ञतापेक्षया अन्तस्सौन्दर्यस्य प्रधान्यात्, तथाविध सौन्दर्येण भासमानः, यः देवः शाक्तैश्वर्यं शक्तिसम्बन्धी विभवः, अनिर्वाच्यमायायाः मायाया अधिष्ठानत्वात् तत्सङ्गतिः, मयि एव अस्तीति प्रकटितमहिमा प्रकटितः महिमा अनेन, यो देवो व्यराजत, तद् ब्रह्मण्यं भजेऽहम्। शिवश्शक्त्या युक्तस्सन्नेव प्रभवितुं शक्त इति, स्वारस्यमुदीरयन्, तादृशी शक्तिः मदधीनेति प्रकटनेन, अविद्याश्रयित्वं वनितासङ्गच्छलेन सूचयति। एवं चाविद्याकार्यवासनाभ्रान्तिमतिक्रान्तान् आत्मज्ञानजिघृक्षून् शुद्धानेवोपदेशेन नाथते स्मेति भावः।

- **प्रह्लादोपदेशः**

अ.व - गुरूपदेशमन्तरा ज्ञानं लब्धुमावश्यकमिति प्रह्लादं दृष्टान्तयति।

**गर्भावस्थासु भक्तः कनककशिपुज- श्श्रीनृसिंहानुगामी**

**वार्धक्ये चोपदिष्टो हरिपदरसिको येन संसार मुक्तः।**

**संस्कारेऽप्यात्मबोधो गुरुवचनवशादेव भावीत्यदर्शि**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 42**

**द.प्र –**

कनककशिपुजः काश्यपस्य हिरण्यकशिपोः सूनुः प्रह्लादनामा, गर्भाद्यवस्थासु सर्वास्वपि भक्तः, श्री नृसिंहानुगामी भगवतः नारायणावतारं श्री नृसिंहमनुसृत्य प्रवर्तत इति, हरिपदरसिकः हरेः पदे पदध्याने रसिकः रसवान्, राज्यभारं निरुह्य, वार्धके अशान्तिमनुभवन् येन दत्तगुरुणा उपदिष्टः बोधितस्सन् संसारात् बन्धनात् मुक्तो बभूव।

तथा च, संस्कारे जन्मान्तराल्लभ्धे संस्कारे सत्यपि, आत्मबोधः आत्मनो ज्ञानं, गुरुवचनवशादेव गुरोः वचनं, तस्य वशादेव भावि सम्भविष्यतीति येन उपदेशिकेन अदर्शि प्रदर्शितमासीत्, तद् ब्रह्मण्यं भजेऽहम्।

यदुराजाय इव परिपक्वमनस्स्थितये प्रह्लादाय, दत्तसद्गुरु रुपदेशपुरस्सरं कैवल्यस्थितिं चरमदशायां अनुजग्राहेति भावः।

## ➢ मात्रुपदेशः

अ.व - लोकानुग्रहाय अवतीर्णेन भगवता, निजदेहं प्रसूता माता चानसूया ममत्वमोहप्रमोचनेन समनुगृहीतेति श्लोकद्वयेन प्रपञ्चयति।

**पुत्रो गन्तेति दुःखाद् विगत निज विदा याऽनसूया तु माता**

**सूतं देहं विहातुं शपथमिव पुरा-वादिनी मोह तप्ता।**

**देहाऽऽत्म भ्रान्ति मस्या स्ससुख मपिनिजाऽसृग्धरां[16] मोचयन् यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 43

**द.प्र –** स्वजनं आश्रमनिवासादिकञ्च त्यक्त्वा, पुत्रः स्वस्य कुमारः गन्ता पुनरागमनरहितं प्रयास्यतीति श्रुत्वा श्रुतवती, दुःखात् शोकावेगात्, विगतनिजविदा विगता निजा विदा[17]

---

[16] असृग्धरा – चर्म।

[17] विदा - विद् ज्ञाने धातोः, क्विबन्तात् आजादिकष्टाप्।

ज्ञानं यस्याः सा, विलुप्ता स्वकीया ज्ञानसम्पत्तिः यस्याः, माता या अनसूया तु, सूतं स्वेन (गर्भधारण पूर्वकं) जनितं, देहं शरीरं विहातुं त्यक्तुं, शपथमिव प्रतिज्ञेव मोहतप्ता सती पुत्रव्यामोहेन सन्तप्ता, पुरा वादिनी पूर्वं परुषवादपरा, यस्मिन् देवस्य विषये बभूव।

ततः निजां शरीरच्छादिनीमसृग्धारां त्वचं, तया सह अस्याः स्वस्य मातुः देहात्मभ्रान्तिमपि। शरीरस्थ एव आत्मा इत्याकारकमज्ञानं च यो गुरुः ससुखं सुखेन दुःखलेशमप्यननुभवन्, मोचयन् आस विमोचयामास, तद् ब्रह्मण्यं भजेऽहम्।

**अ.व-**

ज्ञानिनामपि चेतांसि बलादाकृष्य मोहाय महामाया प्रयच्छतीति, माया प्राबल्य प्रतिपादकपुराण वाक्योपपत्त्या, ज्ञानिनामपि कर्मवशात् सम्प्राप्तस्याज्ञानस्य विहापिका गुरुकरुणेति प्रतिपादयति माद्यन्त इति।

**माद्यन्तो मायया ऽऽत्ता स्स्व सुत परिजन भ्रान्ति लग्ना विदोऽपि**

**तत्रात्यन्तं समर्था गुरुवरकरुणा नास्ति साम्यं तया हि।**

**मुह्य न्मातु र्भ्रमं यो ग्लपय दविकलो बोधको निर्ममोऽस्ति**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 44**

**द.प्र –**

विदः अपि वेत्तारोऽपि, मायया आत्ताः अविद्यया ग्रस्ताः, माद्यन्तः विवेकेन विहीयमानाः, स्वसुतपरिजनभ्रान्तिलग्नाः, स्वं सुताः परिजनाः इति, धनं तनुजाः सेवकाः इति भ्रान्त्यां मग्नाः भवन्ति। तत्र भ्रान्तिनिरसने अत्यन्तं समर्था सक्षमा, गुरुवरस्य सद्गुरोः करुणैव कृपैव। तया साम्यं तौल्यं कुत्रापि नास्ति किल न विद्यते किल।

अतः मुह्यन्मातुः मुह्यन्त्याः मोहदष्टायाः जनन्याः भ्रममज्ञानं, ग्लपयदविकलः, ग्लपयन् नाशयंश्चासौ अविकलः सकलः।

यो निर्ममः ममकाररहितो बोधकः सद्गुरुरस्ति, तद् ब्रह्मण्यं भजेऽहम्। त्वद्मोचनेन शरीरक्लेशे सत्यपि, सर्वात्मकत्वात् सकल एव बभासेति भावः।

## ➢ इन्द्र वरप्रदानम्

अ.व - मातरमनुगृह्य सह्यगिरौ व्यवस्थापिताश्रमपदः दत्तात्रेयो जम्भासुरात् शक्रं ररक्षेति, बोधयति यं संश्रित्येति।

**यं संश्रित्यैव पूर्वं दितिजनि कुलराड् जम्भदैत्याऽऽहत स्सन्**

**सुत्रामाऽऽप्यायितौजा उरुगुरुवरिम श्रीभि रश्रान्त आस।**

**संविभ्रान्ताऽनघा नि र्णुदित निजपृथु श्रीक रक्षां स्यजैषीत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 45

**द.प्र** – दितिजनिकुलराड्जम्भदैत्याहतः दित्याञ्जनिः येषान्तेषां कुलस्य राट्, असुरकुलाधिपतिः। स च जम्भ इति दैत्यः। तेन जम्भदैत्येन आहतः सङ्ग्रामे पराजितस्सन्न्, सुत्रामा इन्द्रः, यं दत्तगुरुं संश्रित्यैव समाश्रित्यैव आप्यायितौजाः, आप्यायितम् वर्धितम् ओजः शारीरकम् बलं, तत्सहितो मानसोल्लासः यस्य, भूत्वा, उरुगुरुवरिमश्रीभिः उर्वीभिः बृहतीभिः गुर्वीभिः महतीभिः वरिम्णः श्रीभिः वरेण्यसंपत्तिभिः पुनस्सँयुतः, अश्रान्तः गतक्लमः आस बभूव।

तथाभूतस्सन्न्, सँविभ्रान्तानघानिर्णुदित - निजपृथु - श्रीक - रक्षांसि, सँविभ्रान्तानि रूपलावण्य मोहेन कामेन च भ्रान्तिमन्ति, अनघया देवस्य मायाशक्त्या, निर्णुदिताः प्रहताः निजाः स्वकीयाः पृथ्व्यः प्रभूताः श्रियः तपःपुण्यसंपत्तयः येषां तानि रक्षांसि। बहुव्रीहौ समासान्तः कप् प्रत्ययः। अजैषीत् समजयत्, तद् ब्रह्मण्यं भजेऽहम्। निरायुध स्सन्न् स्वकीययोगशक्तिं स्त्रीरूपेण अनघानाम्ना च आविर्भाव्य, जम्भारि दैत्यानां

शरीरगत स्थानेषु सप्तसु निभान्तीं श्रिय मुपसंहृत्य, निस्सत्वान् राक्षसान् इन्द्रादिभिः प्रघातयामासेति देवस्य लीला प्रस्तूयते।

पादस्थिता सती लक्ष्मीः गृहदेति, सक्थिस्थिता रत्नवस्त्रप्रदायिकेति, गुह्य स्थानगा दाम्पत्यसुखदेति, क्रोडस्था वंशं वर्धयतीति, हृद्गता सर्वकाम पूर्णदेति, कण्ठस्थिता भूषणानि मृष्टान्नं प्रवासिबन्धु सँयोगं च कारयतीति, मुखसङ्गता सती आज्ञा- कविता वाक्छक्ति दात्रीति वर्णिता।

श्रीर्यदा मूर्धानं आरोहन्ती, रौद्रीभावेन सर्वां शक्तिं संहरतीति, ब्रह्माण्डपुराणोक्ति रत्रानुसन्धेया।

## ➢ अनघा - मायाशक्तिः

**अ.व** - दत्तगुरोः अवतारितायाः अनघायाः मायाशक्त्याः नामरूपकृत्यानां वैचित्री मुत्प्रेक्षते।।

**यन्निष्ठाऽस्त्यद्वया साऽऽवरणकृति परा यैव विक्षेप रूपा**

**विस्मार्यैव स्वरूपं क्षिपति हि बहुधा येन्द्रियार्थेषु चित्तम्।**

**पापे जीवान् प्रचोद्या-पि तु पुन रनघा सञ्जयत्यच्छकृत्या**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 46**

**द.प्र -**

यन्निष्ठा यस्मिन्देवे निष्ठा संस्थिता, अद्वया द्वैतरहिता माया आवरणकृतिपरा बुद्धिमतां विवेक मावृणाना, विक्षेपरूपा अनात्मनि आत्मभाव बुद्धिं कल्पयन्ती, चित्तविक्षेपकारिणी, साम्यौपम्य रहिता, या अस्ति या वर्तते, सैव स्वरूपं जीविनां स्वं सत्यज्ञानानन्दात्मकं आत्मरूपं, विस्मार्य स्मृतिमपगमयित्वा, इन्द्रियार्थेषु विषयेषु, चित्तं बहुधा क्षिपति हि विक्षेपं करोतीति प्रसिद्धि रेव।

आवरणशक्ति विमोहितान् विक्षेप वात्या संभ्रान्तान् जीवान् पापे दुरितकरणे प्रचोद्य योजयित्वाऽपि, अच्छकृत्या निपुणं कृत्यं यस्याः।

अहो चित्रं, सर्वजीविनः स्वीयकर्मानुसारेण स्वेषु स्वेषु कर्मसु दुरितादिषु प्रचोदयन्ती सत्यपि, (पापप्रचोदिकाऽपि) यन्निष्ठा सा शक्तिः अनघा अघरहितेति प्रसिद्धा सञ्जयति विजयते तद् ब्रह्मण्यं भजेऽहम्।

## ➢ पातयन्ती – मोचयन्ती शक्तिः

अ.व - पूर्वकर्मवशंवदेऽपि नरे, स्वायत्तता सद्भावं निरूपयितुं स्वामिनिष्ठां मायाशक्तिं द्वैविध्येन प्रस्तौति प्रस्रोतांसीति।

**प्रस्रोतांसीन्द्रियाणां कतिचन विविधेऽभिद्रवन्तीन्द्रियार्थे**

**संयन्तुं शक्नुवाने नियमित मनसि प्रोज्ज्वलन्ती यदीया।**

**तद्भिन्ने जृम्भमाणा ग्रसति तु बहुधा यस्य शक्ताऽनघाऽऽख्या**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 47

**द.प्र** – इन्द्रियाणां कति चन प्रस्रोतांसि कति पये प्रवाहाः, विविधे इन्द्रियार्थे बहुविधेषु विषयेषु अभिद्रवन्ति आभिमुख्येन सन्ततं गच्छन्ति। ताः चित्तवृत्तीः सँयन्तुं दमयितुं, शक्नुवाने परमात्मना विहितं विवेकबुद्धिं प्रयुञ्जाने पुरुषे, नियमितमनसि नियन्त्रितं चेतः यस्य तस्मिन्न् धीमति, प्रोज्ज्वलन्ती आवृतिविक्षेपयोरुपसंहरणेन प्रकाशमाना यदीया यद्दत्तगुरु समुद्भूता माया, तद्भिन्ने धीमतः भिन्ने, नियमितमनसः इतरस्मिन्जने (विषयसप्तम्येषा) यस्य देवस्य अनघाख्या शक्तिः शक्ता समर्था सती जृम्भमाणा, चापलचित्तस्य विषये बहुधा प्रलोभादिप्रयोगेन मनो ग्रसति गृह्णीते, तद्ब्रह्मण्यं भजेऽहम्।

पूर्वकर्मफलमनुभवन्नपि मनुष्यः संसारचक्रादेतस्मात् विमुमुक्षुश्चेत्, तदवकाशो नराय भगवता सदसद्विवेकरूपेण प्रदीयते हि।

स्वीयविवेकप्रचोदनेन सन्मार्गमधिरूढान् जनान् विमोचयन्ती मायाशक्तिः, तादृशप्रयतन विहीनान् स्वस्य मायावलये पातयतीति भावः।

## ➢ देवता वर प्रदानम्

अ.व - मायाया ग्रसनं न केवलं मनुष्याणामिति, देवाश्च तया निरस्ता इति बोधयितुं प्रवर्तते नष्टप्रज्ञेति।

**नष्ट प्रज्ञाः प्रलीना स्तमसि महति ते धातृ भान्वादि देवाः**

**यं किङ्कर्तव्य मूढा- स्स्वविषयक रुजां नाशनायाऽऽश्रिताश्च।**

**चित्रं लीला महिम्ना ह्यधिगत सुधियो मोदिता स्स्वस्थताऽऽप्ताः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 48**

**द.प्र –**

महति तमसि महामायान्धकारे, प्रलीनाः प्रकर्षेण लयमापन्नाः धातृभान्वादयो ब्रह्मसूर्याद्या देवाः, स्वविषयक रुजां निजरोगाणां मानसिकानां शारीरकाणाञ्च नाशनाय अपाकरणाय, किङ्कर्तव्यमूढाः किं कर्तव्यमिति अजानन्तः, यं दत्तसद्गुरुं, आश्रिताः समाश्रयन्तः, यस्य लीलामहिम्ना लीलानां सङ्कल्पचेष्टानां महिम्ना, अधिगतसुधियः अधिगता सुष्ठु धीः यैस्ते, चित्रं सविस्मयं स्वस्थताऽऽप्ताः स्वस्थतया स्वास्थ्येन स्वरूपभावेन आप्ताः व्याप्ताः मोदिताश्च शुभावाप्तेः, सन्तोषिताश्च बभूवुः, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ सूर्य पापोपशमः

अ.व - दैववशात् रविणा अनुभूत मज्ञानमूलकं दुःखं विवृणोति कृत्याकृत्येति।

**कृत्याकृत्ये विवेक्तुं प्रभवति यदि चे- न्मोह विद्धं न चित्तं**

**दिष्ट्या पूर्वं प्रविद्धो रवि रपि दुहितु स्सङ्ग वाञ्छाऽभितप्तः।**

**जिह्रेति स्म स्व पाप क्लमभर विकलो यद्गुरोः प्रोद्धृतोऽभूत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 49**

द.प्र –

कृत्याकृत्ये कर्तव्य मकर्तव्यं पुण्यपापनिमित्तं, विवेक्तुं विश्लेषयितुं जनः प्रभवति समर्थो यदि भवति चेत्, चित्तं मनः, मोहविद्धं मोहेन विद्धं हतं, न भवति किल।

पूर्वं पुराकल्पे, दिष्ट्या विधिवशेन प्रविद्धः हतः रविरपि सूर्योऽपि, कदाचित् दुहितुः भानुमती नामिकायाः स्वपुत्रिकायाः, सङ्गवाञ्छाऽभितप्तः, सङ्गस्य प्रामादिकस्य मिथुनीभावस्य वाञ्छया काङ्क्षया अभितप्तः सन्तप्त स्सन्न्, तावदन्तरेण स्वेन चिकीर्षितेन महापापेन लक्षितः जिह्रेति लज्जते स्म।

ततः स्वस्य पापस्य क्लमभरेण क्लेशभारेण विकलः कलाविहीनः, यद्गुरोः यस्मात् दत्तगुरोः हेतोः, प्रोद्धृतः अभूत्। स्वाश्रमे कर्तव्यां तपस्या मुपदिश्य तीर्थस्नपन द्वारा कुष्ठरोग मपाकृत्य अन्वगृह्यत, तद्ब्रह्मण्यं भजेऽहम्।

अधुनाऽपि दोषापनयनाय सूर्येण सुस्नातं तीर्थराजं सह्यपर्वतसानुषु भानुतीर्थाख्यया विराजत इति प्रसिद्धिः।

## ➢ अविद्या सृष्टिः

अ.व - कल्पादौ स्त्रीपुंस सँयोगात्मिकां स्वयं चालितां सृष्टिं, अन्वारीप्सुः ब्रह्मा अविद्यां सिसृक्षन्न् तया व्यामूढः दत्तसद्गुरोर्द्वारा पुनर्वेदप्रकाश मलभत इति विशदीकुरुते स्त्रष्टेति।

**स्रष्टाऽप्येवं स्वसर्गे बत सृजनकृते धित्सु रासी दविद्यां**

**सर्वोल्लीनाभिशक्तां हुतभुगुपमितां पञ्चपर्वां यदीयाम्।**

**तीव्र ध्यानात् तदस्या यदुपगतिपरो विस्मृत श्रौत विज्ञः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 50

**द.प्र –** एवं स्रष्टाऽपि पूर्वोदितरीत्या मायालग्नो देवराजाग्रणीः ब्रह्माऽपि, सृजनकृते सृष्ट्याः कृते, निरन्तरं स्वयं प्रवर्तिताय उत्पत्ति कर्मणे, स्वसर्गे स्वस्य सर्गे, स्वेन सृष्टेषु जीविषु, सर्वोल्लीनाभिशक्तां - सर्वाणि भूतानि उत्कर्षेण लीनानि यस्यां सा सर्वोल्लीना, अभीक्ष्णं शक्ता अभिशक्ता, सर्वोल्लीनां च तामभिशक्तां, पञ्चपर्वां, तामिस्र-अन्धतामिस्र- मोह- महामोह- अविद्याऽऽत्मकानि पञ्चसङ्ख्याकानि पर्वाणि यस्या स्सा, ताम्। अनो बहुव्रीहेः इति डाप्। यदीयां यद्दत्तदेवाश्रयिणीं हुतभुगुपमितां हुतभुजा वह्निना उपमितां, सर्वभक्षकत्वेन सम्भाव्यमानां यदीयां अविद्यां भ्रान्तिरूपां, धित्सुः आसीत्।

बत अहो तदस्याः अविद्यायाः तीव्रध्यानात् आधाननिमित्तेन सन्ततचिन्तनेन विस्मृत श्रौत विज्ञ स्सन्। श्रुते रियं श्रौती, विस्मृता श्रौती विज्ञा विज्ञानसंपत्ति र्येन सः, धाता यदुपगतिपरः आसीत्, यमुपाधावत्, तद्ब्रह्मण्यं भजेऽहम्।

## अनघा शक्ति संश्लेषः

अ.व - दत्तसद्गुरोः प्रादुर्भूतायाः शक्तेः ब्रह्मणः वेदविज्ञानप्रकाशं प्रपञ्चयति।

**दुस्साध्या मप्रतर्क्या मनितर सुशकां स्वान्त वाचा मनीक्ष्यां**

**संश्लिष्टो योऽनघां तां जलज किसलया- ब्बिन्दुव न्निर्विकारः।**

**तद्वक्त्राद् वेधसे स्व श्रुतिगण सुविदं स्फोरयामास पूर्णं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।**51

**द.प्र –** अप्रतर्क्यां इय मित्थमिति दुरूह्यां, अनितर सुशकां अनितरस्य अज्ञानिभिन्नस्य विज्ञानिनः एव सुसाध्यां, स्वान्तवाचां मनोवचसां, अनीक्ष्यां अदृश्यां, अनिर्वचनीयगूढतत्त्वां स्वां शक्तिं, प्रश्लिष्टः सन्नपि आश्लिष्टोऽपि सदा मायाशक्तिसङ्गतोऽपि, जलजकिसलयाब्बिन्दुवत् पद्मपत्राङ्कुरगतजलबिन्दुवत्। सदा जले प्ररूढं अद्भिः सङ्गतमपि पद्मपत्रं यथा अनार्द्रं अक्लिन्नं भवति, तथा निर्विकारः विकारहीनः, अनीहः ईहाभिः इच्छाभिः विरहितः, यो दत्तगुरुः आस्ते वरीवर्ति। एवञ्च वेधसः ब्रह्मणः स्वं धनम्, श्रुतिगणसुविदं वेदराशेः विज्ञानं पूर्णं संपूर्णतया, तद्वक्रात् पूर्वोदिताया अनघाशक्त्याः मुखात् यः स्फोरयामास यः अवागमयत्, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ आश्रम पदम्

अ.व - वर्णाश्रमधर्मनियमातीतस्य निस्त्रैगुण्यपथे विचरतः भगवतः, आश्रमपदस्य निरूपणं सर्वोपेततया दुश्शकमिति समुत्प्रेक्षते किं व्याख्याम इति।

**किं व्याख्याम स्तदीया ऽऽश्रम पद ममलं ब्रह्मचर्य व्रतेतं**

**षण्णां[18] षण्णां गुणानां गृहमपि च सतां चिद्घन प्रस्थितानाम्।**

**सन्न्यासेन प्रसिद्धं रिपु दुरित मते स्सह्यगिर्योस्थितं वा**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 52**

**द.प्र –**

तदीयाश्रमपदं, तदीयं तस्य दत्तात्रेयस्य स्वामिनः आश्रमपदमाश्रमस्थानं, आ समन्तात् नियमैः श्राम्यत इत्याश्रमः, श्रमु तपसीति धातोः, पचाद्यच्। यद्वा श्रौतस्मार्तनियमान् वैधमाचरति जनः अस्यामवस्थायामस्मिन् काले वा, इति कर्त्रर्थः अच्, तस्य पदं स्थितिः पदवी वा। इत्थम्भूत इति किं व्याख्यामः? निश्चित्य किं ब्रूमः?

---

[18] शम दमादयः षड् गुणाः, ऐश्वर्यस्य समग्रस्य इत्यादि षट् भगवल्लक्षणानि। रिपवः – कामक्रोधादयः।

अत्याश्रमिणः स्थितिरनिर्वर्णनीयेति वाचां कुण्ठितत्त्वं ध्वन्यते। आश्रमाणां चतुष्टयत्वात् वर्णनाप्रकारचतुष्टय्यपि, अथ सम्भाव्यते।।

ब्रह्मचर्यव्रतेतं ब्रह्म वेदः, परं ब्रह्मेति वा। तच्चरति ताच्छील्यार्थको णिनिः। नित्यं वेदमध्येति, परस्मिन् ब्रह्मणि वा नित्यं मनो लापयतीति ब्रह्मचारी तस्य भावः ब्रह्मचर्यं, तदेव व्रतं नियमः। तेन ब्रह्मचर्यव्रतेनेतं सङ्गतं, अत एवामलं, अपगतमालिन्यमाश्रमपदमिति।

ततः सर्वाश्रमाधारभूतगृहित्वमुद्भाव्यते। षण्णां षण्णां गुणानां गृहं आश्रयभूतं तदीयं पदमिति। वीप्सायां द्विर्भाव इति षण्णामित्यस्यावृत्तिः। अनेकप्रकारकस्य षाड्गुण्यस्य प्रसक्तिः व्याख्येया। अथवा षण्णामिति प्रथमेन भगवल्लक्षणषट्कम्, ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा, इत्यनेनानुसन्धेया। द्वितीयेन शब्देन तु मुमुक्षूणां विमुक्त स्थितप्रज्ञोचिता शम दमोपरति, तितिक्षा, समाधान, श्रद्धात्मिका गुणषट्कसम्पत्तिः लक्ष्यते। सर्वस्य जगतः गुणोपेतत्वात् भगवतः तादृशगुणाश्रयत्वाच्च सर्वश्रमाऽऽधारता दत्तात्रेयस्य युज्यत इति भावः।

निर्वृत्त संसृतिधुरां, तुर्यस्थितिमभिलिप्सूनां, तार्तीयीकाश्रम मभिजिघृक्षाणाञ्च लक्षणमपि भगवतः अन्वेतीति सम्भाव्यते। चिद्घनप्रस्थितानां चिदेव वनं सान्द्रं स्निग्धं गहनं ज्ञानारण्यं, तस्मिन् प्रकर्षेण स्थिताः, तेषामात्माश्रयाणां सतां सज्जनानामवस्थित्या दत्ताश्रमः वानप्रस्थतामपि लभत इति भावः। यद्वा चित् ज्ञानं, तस्मै तल्लभाय वनमरण्यं प्रस्थितानां, गृहबन्धानुत्सृज्य निर्गतानां मुमुक्षूणां विविदिषूणाञ्च सत्पुरुषाणां निकेतनमिति भावः।

अथ तुरीयाश्रमलक्ष्माणं दत्ताश्रमं सम्भावयति। सह्यगिर्यास्थितं सह्य इति गिरौ पर्वतश्रेण्यामास्थितं समन्तात् व्याप्य संस्थितं तदीयं दत्तात्रेयस्याऽऽश्रमपदं, रिपुदुरितमतेः रिपुभूते दुरिते पापविषये मतिः बुद्धिः, तस्याः सन्न्यासेन त्यागेन प्रसिद्धं प्रथितमिति वा।

एवञ्चातुर्विध्ये सिद्धे, किं ब्रूमः? कतममिति वच्मः? कीदृशः तस्याश्रम इति व्याख्यातुमसुलभमिति संशीयते। तथाविधानिर्वर्णनीयाऽऽश्रमिणं, तस्मिन् ब्रह्मणि स्थितं दत्तं भजेऽहम्।

केवलस्य - द्वैतातीतस्य, रिपुभावः क्वचिदपि न सङ्गच्छते। सजातीय विजातीय स्वगत परगत भेदराहित्यादपकारप्रतीकारौ वा, तत्फलकं दुरितमपि न सम्भवतः। येन ब्राह्मीस्थितिमनुभवता द्वैतभावमेव नितरां सन्न्यस्तं, तत्र पापलेशोऽपि भवितुं नार्हतीति सन्न्यासाश्रममहिमा। तथा च तदाश्रमभाजोऽपि तथाविधा बोभूयन्त इति च, भगवतः तुरीयाश्रमप्रशंसा चात्रोन्नेया।

सह्यगिर्यास्थितमाश्रमपदमित्यत्र सह्यपदं चान्वर्थमेव। सर्वाश्रमिषु श्रुतिस्मृतिभ्यां विहितान् यमनियमान् सोढुं, तदाचरणक्लेशमवगणयन्, अपेक्षितनिष्ठामवलम्बयितुं वा सक्षमो जनः यत्र भवति, तत् सहनशील-प्रदायकं प्रशस्तं स्थानमेव सह्यमिति विद्वत्सु प्रतीयते। विधूतसर्वबन्धनस्य अवधूतस्थितिप्रवृत्तस्य दत्तात्रेयस्य नैकदेशः स्वदेश इति समन्ताद्व्याप्य, तदाश्रमपदञ्च प्रभुचरणमुद्रिकामनु सर्वत्र समातिष्ठतीति व्याप्तिरनुमाप्यते।

## ➢ बहुल रूप दर्शनम्

अ.व - सर्वाश्रमलक्षण समन्वयानन्तरं सकलविधजनान्तर्यामितां निरूपयितुमिव वैविध्येन दृष्टस्य भगवतो रूपवैचित्रीं कार्यबाहुल्यं च वर्णयति यस्येति।

**यस्यानिर्वाच्य चर्या मुनि विडनुगुणा स्यात् कदाचि द्विरुद्धा**

**पाखण्डासंस्कृतार्हा- ऽवगुणित मलिना दृश्यते वाऽतिचित्रा।**

**भक्तेषूद्बा घृणां वा कलुष परिहरा त्रायते शाम्भवी च**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 53

**द.प्र -**

यस्य देवस्य, अनिर्वाच्यचर्या ईदृशीति निर्वक्तुमशक्या। अनिर्वाच्या चर्या आचारसरणिः, कदाचित् काले मुनिविडनुगुणा मुनिजनोचिता स्यात्। मुनिवेषसमन्विता तपोनियमादिभिर्लक्षिता भवेत्। कदाचित् विरुद्धा तन्मुनिकर्मविगर्हिता च दृश्यते।

पाखण्डासंस्कृतार्हा- पाखण्डाः वेदनिन्दकाः, असंस्कृताः संस्कारविहीनाः। पाखण्डाश्चामी असंस्कृता इति विशेषणोभयपद कर्मधारयः। तेषामर्हा योग्या। अवगुणितमलिना अवगुणितानि अवगुणत्वेन भावितानि मलिनानि यस्यां सा चर्या, अतिविचित्रा अत्यन्तमाश्चर्यकरी दृश्यते। अथवा भक्तेष्वाश्रितेषु, घृणां बहुलं प्रदर्शितां जुगुप्सां, परीक्षाव्याजेन अभिनीतमौदासीन्यं, वितीर्णां करुणां वा, ऊढ्वा निरूह्य दत्तस्य चर्या दृश्यते। एवञ्च घृणाशब्दस्याऽर्थत्रयमपि चर्यायां सार्थक्यमेति।

तथाविधा चर्या भिन्नमार्गस्वीकारेऽपि कलुषपरिहरा दोषापहारिणी, त्रायते भक्तजनान् रक्षति। अत एव शाम्भवी शं सुखं भावयतीति विश्रुता, तद् ब्रह्मण्यं भजेऽहम्। शाम्भवी इति योगमुद्रा हठयोग ग्रन्थेषु प्रसिध्यति।

- ## गुणत्रयातीतत्वम्

अ.व - जगति सन्दृष्टं रूपबाहुल्यं भगवतः प्रतिपाद्य, सर्वलोकहेतुभूतं गुणत्रयमपि लोकान्तर्वर्तिना समतीतमिति विशिनष्टि सत्त्वेनेति।

**सत्त्वेनोद्रिक्त मास्ते क्वचिदथ रजसा तामसेनापि भूयः**

**लोके सर्वस्वभावः किल गुण रचितो गौण मुख्य प्रभेदात्।**

**योऽतीतो वर्तते तत् त्रितय मतिमति स्स्वस्थितौ वस्तुतस्तु**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 54**

**द.प्र –**

लोके ब्रह्माण्डे, सर्वस्वभावः सर्वस्य वस्तुनः जीविनः स्वभावः स्वस्य भावः प्रकृतिः। गुणरचितः गुणैः त्रिगुणैः रचितः सृष्टः किल। तथाऽपि गौणमुख्यप्रभेदात् गौणः अल्पीयान् मुख्यं ज्यायानिति न्यूनाधिक्यय प्रभेदादेव, क्वचित् सत्त्वेन सत्त्वगुणेन, अथवा रजसा रजोगुणेन, तामसेन तमोगुणेन वा, भूयः उद्रिक्तमुल्बणमास्ते, लोकस्य प्रकृतिः भवति।

एवं गुणानां त्रयाणामुच्चावचत्वेन प्रभिन्ने लोकस्वभावे, तदधिष्ठातुरपि गुणावगुणसम्भवतामाशङ्क्य प्रतिपादयति। यो देवः मायासंसर्गात् त्रैगुण्येन समन्वितस्सन्, सर्वभूतात्मभावेन दृष्टोऽपि, स्वस्थितौ स्वः आत्मा। स्वस्य आत्मनः स्वकीयायां सच्चिदानन्दस्थित्यां स्वरूपलक्षणत्वेनाभिहितायां, तत्त्रितयं सत्वरजसस्तमसां गुणानां त्रिकं, एवं दृक् द्रष्टृ दृश्यमिति त्रिपुटीश्चातीतो वर्तते। अत एवातिमतिः। अतिक्रान्तो मतिम्। अत्यादयः क्रान्ताद्यर्थे द्वितीययेति प्रादिसमासः। मनोवाचामगोचरः केवलस्सन् यो वरीवर्ति, तद्ब्रह्मण्यं भजेऽहम्।।

## ➢ कार्तवीर्यः - सेवनम्

अ.व - निस्त्रैगुण्यपथजुषं देवं सेवमानेन, शप्तस्य सुदर्शनस्यांशतया भुवि गृहीतजन्मना अर्जुननामकेन कार्तवीर्येण सङ्गृहीतवरवैभवं प्रस्तोतुमुपक्रमते निस्त्रैगुण्येति।

**निस्त्रैगुण्य व्रताप्तं प्रभज दसुलभं सर्वसङ्गोज्झितं यं**

**पाण्योः प्राबल्य मिच्छन् भगवत उदितां सानुकम्पां दृशञ्च।**

**आगत्यासौ ददर्शा- र्जुन पद विदितो हैहयः कार्तवीर्यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 55

**द.प्र –**

निस्त्रैगुण्यव्रताप्तं, त्रैगुण्यान्निर्गतं निस्त्रैगुण्यम्। तदेव व्रतम् आप्तः, तम्। द्वितीया श्रितातीतेति तत्पुरुषः। गुणत्रयाद्बहिर्भूत्वा स्वस्थित्यां कैवल्ये भवनमिति यावत्। असम्प्रज्ञातसमाधिव्रतमुपात्तमनेनेति। अत एव सर्वसङ्गोज्झितं, सर्वे सङ्गाः भर्तृभार्यपुत्रशिष्याश्रितादयः सङ्गाः उज्झिताः परित्यक्ताः येन, कैवल्यस्थितौ वर्तमानत्वात्। प्रभजदसुलभं प्रभजतां संवेविष्णूनामसुलभं दुस्साध्यं, यं देवं पाण्योः आजन्म निस्सत्वयोः स्वस्य करयोः प्राबल्यं, सुष्टुभावं क्षत्रियोचितबलसमृद्धिञ्च, भगवतः देवादुदितां निस्सृतां सानुकम्पां दृशं करुणादृष्टिं चेच्छन्नभिवाञ्छन्, हैहयः हैहयवंशीयः कार्तवीर्यः कृतवीर्यस्य अपत्यं पुमान्, अर्जुनपदविदितः अर्जुन इति नाम्ना प्रसिद्धः, असावेष राजकुमार आगत्य, सह्याश्रमं दत्ताश्रममेत्य ददर्श दर्शनभाग्यं समापत्, तद् ब्रह्मण्यं भजेऽहम्।

**अ.व -** कार्तवीर्येऽनुग्रहवता देवेन श्रद्धाभक्तत्योः निरूपितेति ब्रवीति शिष्यादानेति।

**शिष्याऽऽदाने प्रतीक्ष्णो हतकरयुगलं सेवया श्रन्थमानं[19]**

**प्रेक्षाया ईक्षमाणं स्मित हृत कलुषो योऽनुजग्राह दीनम्।**

**श्रद्धाभक्ती यदि स्तो भवति हि सुकृती-त्येव सन्दर्शयंश्च**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 56**

**द.प्र -** शिष्याऽऽदाने शिष्याणामादाने, शिष्यत्वाङ्गीकारे प्रतीक्ष्णः अत्यन्तं तीक्ष्णनियमवान् अनर्हान् नितरामनङ्गीकुर्वाणः। स्मितहृतकलुषः स्वस्य स्मितेन हृतं परिहृतं कलुषं कायिकमानसिकदोषजातं येन, सः देवः, दीनं शरीरक्लमेन परिदूनं, हतकरयुगलं हतं करयोर्युगलं यस्य तं, नाममात्रावशिष्टकरावपि सेवनविधौ यस्य लुप्तौ तादृशं, सेवया

---

[19] श्रथि – शैथिल्ये (35)

परिचर्यया श्रन्थमानं शिथिलीकृतदेहं, प्रेक्षायै गुरोः दयादृष्ट्यै, ईक्षमाणं प्रतीक्षमाणं कार्तवीर्यार्जुनं, यो देवः अनुजग्राह अनुगृहीतवान्, तदनुग्रहणविधानेन श्रद्धाभक्ती श्रद्धा च भक्तिश्च, यदि स्तः यदि वर्तेते, स हि सुकृती हि, पुण्यवान् पुण्यकर्मा सफलो भवतीति, सन्दर्शयन् कार्तवीर्यवरप्रदानप्रसङ्गेन निरूपयामास, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ कार्तवीर्य वरदानम्

अ.व - श्रद्दधानस्य कार्तवीर्यस्य सेवया प्रतुष्टेन भगवता प्रत्तान् वरान् विवृणोति सन्तुष्यन्निति।

**सन्तुष्यन् कार्तवीर्या - र्जुनपरिचरितोऽदत्त बाहून् सहस्रं**

**राज्ञे क्ष्मायाः प्रभुत्वं विपुलतरविदं धर्म मार्गोपदेशम्।**

**नष्टद्रव्याऽऽपकत्वं वयसि च चरमे सुप्रसिद्धा न्मृतिं यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 57

**द.प्र** – कार्तवीर्यार्जुन परिचरितः, कार्तवीर्येण कृतवीर्यस्यापत्येन पुंसा अर्जुनेन परिचरितः संसेवितः सन्तुष्यन् तदीयसेवानिरत्या मुदितस्सन्, राज्ञे तस्मै हैहयराजाय, सहस्रं बाहून् स्वच्छन्दं प्राप्यमाणं बाहुसहस्रं, सहस्रमिति अत्यधिकशक्त्युपलक्षकमेतत्। क्ष्मायाः भूमण्डलस्य प्रभुत्वमाधिपत्यं, विपुलतरविदं अतिशयितं ज्ञानं, धर्ममार्गोपदेशं सुसूक्ष्मधर्मनिर्णयविवेचनसन्धायकं उपदेशं,अथवा मुहुरपि प्रामादिकात् अधर्मप्रवृत्तै सत्यां गुरुजनद्वारेण ऋजुमार्गोपदेशलाभञ्च, नष्टद्रव्याऽऽपकत्वं भुवि स्थितानां प्रजानां प्रमादवशेन चौर्येण वा नष्टानां द्रव्याणां वस्तुनामापकत्वं, स्वनाम-पुरश्चरणमात्रेण लाभकत्वशक्तिं, चरमे च वयस्यन्तकाले आसन्ने, जीविषु मृत्योरवश्यं भावित्वात्, सुप्रसिद्धात् महितात्मनः महायोधस्य निमित्तात् मृतिं निधनञ्चेति वरस्तोमं यः देवः समृद्धतयाऽदत्त, तद् ब्रह्मण्यं भजेऽहम्।

अ.व - निरन्तरविशिष्टार्थलाभाय सुलभोपायतया दत्तसद्गुरुणा समुपदिष्टं अनघाव्रतविधान माचष्टे गार्हस्थ्येति।

### ➢ अनघा व्रतोपदेशः

**गार्हस्थ्ये दृश्यमानं स्वमपि च दयिता मष्ट पुत्रान् भजस्व**

**अष्टम्यामिष्टदाना- वसर शुभदिने चैतदेवानघाऽऽख्यम्।**

**नित्यं भक्तेष्टदायि व्रत मति सुलभं यस्तु राज्ञे दिदेश**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 58

द.प्र – हे राजन्- गार्हस्थ्ये गृहस्थस्येदं इति गुणवचनब्राह्मणादिभ्य इति ष्यञ्। गृहस्थाश्रमे दृश्यमानं लीलायमानं स्वमात्मानं मां, दयितां मम अनघाख्यां स्वीकृतपत्नीरूपाञ्च मायाशक्तिं, मम अष्ट पुत्रान् मायासर्गेण बहुधाऽभिव्यक्त - शक्तिविभवान्, अणिमाद्यष्टसिद्धिरूपान् पुत्रकल्पान्, इष्टदानावसर शुभदिने त्वयेष्टानां वराणां मत्तः दानस्यावसरे शुभदिने शुभावसरे, अष्टम्यां प्रत्यब्दं मार्गशीर्षबहुलाष्टम्यां (सहोऽसिताष्टमी तिथौ) भजस्व पूजाद्युपचारैः सेवस्व। एतदेव अनघाख्यं अनघानामकं विशिष्टं व्रतम्।

कायिकं मानसिकं वाचिकमघं न भवति नावशिष्यति यस्मात्, तदनघाव्रतम्। यद्वा सर्वाघदूरीकरणशक्तं दत्तात्रेयस्वरूपमनघमिति प्रसिद्धम्। अनघदेवमाश्रिता मूलप्रकृतिरूपिणी अविद्योपसंहरणद्वारा सर्वदुरितनिवर्तिका सर्वाघविनाशिका वा शक्तिरेवानघा। तदीया पूजाविधिरेवानघाव्रतम्।

एतद् व्रतमतिसुलभं आचरितुमत्यन्तसुकरम्। अतः प्रत्यब्दं प्रतिमासं वाऽचरणात् नित्यं भक्तेष्टदायि, अजस्रं भक्तानामिष्टान् कामितान् ददाति, इति यो देवः राज्ञे कार्तवीर्यार्जुनाय दिदेश लोकानुग्रहैककामात् प्रोवाच, तद् ब्रह्माण्यं भजेऽहम्।

## ➢ धर्मोपदेशः

अ.व - भूमण्डलाधिपतेः अपेक्षितं शक्तिसर्वस्वं तद्विवर्धनोपायञ्च प्रदाय, सुष्ठु परिपालनविधानजीवस्थानीयं धर्मं साकल्येन दत्तात्रेयो बहुधा ऽब्रवीदिति कथयति लोकमिति।

**लोकं दध्रे धरिष्यन् धरति खलु सना धर्म एवेति बुद्ध्वा**

**वेदोक्तं कर्मजातं परिचर सुधिया धर्ममेवाऽऽद्रियस्व।**

**इत्युक्त्वा यस्तु धर्मा- न्तर बहुविषयान् सन्दिदेशेश्वरो हि**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 59

**द.प्र –**

हे राजन्- लोकं इममामुष्मिकञ्च लोकं, पूर्वतने कालेऽनादिकाले, सना सनातनः धर्म एव शाश्वतिको धर्म एव धर्म एव दध्रे दाधार। अद्यापि स एव धरति, आगामिकाले च सैव धरिष्यन् धरिष्यते, इति बुद्ध्वा वित्त्वा, वेदोक्तं कर्मजातं वेदेन प्रचोदितं कर्मनिचयम्। चोदनालक्षणार्थो धर्मः इत्यादिवाक्यैः महर्षिभिः निरुक्तं लक्षितं धर्मं, धर्मकार्यसमूहं सुधिया स्वच्छमनसाऽनपकारधिषणापूर्वक सकलश्रेयस्साधनतया सन्मत्या आद्रियस्व, आदरभावेन स्वीकुरुष्व।

आभिचारिक व्यतिरिक्तं द्वेषभावहीनमैहिकामुष्मिकसत्फलसाधकं धर्मं परिचर, सदाऽनुतिष्ठ। इत्युक्त्वाऽनुशास्य धर्मान्तरबहुविषयान्, धर्मस्य आन्तरान् सूक्ष्मेक्षिकामात्रग्राह्यान् बहून् विषयान् धर्मस्वरूपसाक्षात्कारेणैवाऽवगम्यमानान् अनल्पसंख्याकग्रन्थसारभूतान् सिद्धान्तान्, राज्ञे कार्तवीर्याय यः ईश्वरः धर्मस्य प्रभुः सन्दिदेश हि, सम्यगुपादिदेश। हीति पुराणप्रसिद्धं सूचयति। तद् ब्रह्मण्यं भजेऽहम्।

धर्मो रक्षति रक्षितः, धर्मं चर, धर्मान्नप्रमदितव्यम्- इत्यादिभिः शास्त्रवाक्यैः लोकसन्धारको धर्म एवेति निश्चित्य, लोकशब्दोपलक्षितान् जीवान् त्रिष्वपि कालेषु सन्मार्गे प्रचारणार्थं, तद्धर्ममादिदेश देव इति भावः। ततश्च क्षत्रं यदि धर्मोपेतं भवति, तदा प्रजा अपि धार्मिकास्युरिति स्वारस्यमूरीकारयति भूमण्डलाधिपतिमूलक उपदेशः।

## शास्त्र विरोध परिहारः

अ.व - विभिन्नविषय प्रतिपादकत्वात् शास्त्राणां मिथोविरोधाभासः, असकृत् सम्भवतीति, तत् समन्वयफक्किकामपि परमगुरुरेव प्रादादिति वर्णयति शास्त्राणामिति।

**शास्त्राणां गूढतत्त्वं विविध विषयिणां गम्य मेकं हि तेषां**

**बाहुल्यञ्चाध्वनां स्यात् पर मिह चिनुया दन्तिमं लक्ष्य मेकम्।**

**जानीमस्तद्रहो यद् गुरुवचन बला देकवाक्यत्व माप्य**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 60

**द.प्र** – हे शिष्य- विविधविषयिणां, बहुविधाः विस्तृताः विषयाः एषामिति मत्वर्थीय इनिः। तेषां, शास्त्राणां प्रवर्तकनिवर्तकानां षड्दर्शनानां, गम्यन्तु चरमं प्राप्यन्तु गूढतत्त्वं गूढं हितं प्रज्ञानं एकमेव अभिन्नमेवेत्यवेहि। किञ्च येषामध्वनां प्रतिपादकमार्गाणां बाहुल्यं वैविध्यं भवेत्। अत एव वैरुध्यभावमपि क्वचित् स्यात्। परन्तु प्रतिपाद्यं अन्तिममेकं परं लक्ष्यं प्रधानं कैवल्यमिह लोके साधको भवान् चिनुयात् अधिगच्छेत्। विविधशास्त्रवादकोटिषु सँलग्नचेतसा शिष्येण प्रमेयं ब्रह्मज्ञानं कदाचिदपि नोपेक्षणीयमिति जागरयता भगवता, सिद्धान्ताभ्युपगमे तत्समन्वये नित्यमाग्रहः कर्तव्य इति भावः।

यद्गुरुवचनबलात् यस्य गुरोः वचनानामुपदेशवचसां बलात् महिम्नः, उपायमिमं, समन्तादेकवाक्यत्वमाप्य सकलशास्त्रसिद्धान्त-प्रतिपाद्य-वस्तुनः अभिन्नतारूपं सारं

संप्राप्य, तद्रहः शास्त्ररहस्यं कार्तवीर्याऽर्जुनद्वारा प्रबोधितमिति जानीमः, महितगाधाप्रसङ्गेन मन्महे - तद् ब्रह्मण्यं भजेऽहम्।

बहुश्रुतेन प्रज्ञाप्रेप्सुना कार्तवीर्येण राज्ञा असकृदनुष्ठापित बहुशास्त्रप्रसङ्गेन अनधिगत स्समन्वयः, दत्तगुरोरुपदेशवशादेव सुलभं विद्वद्भिरधिजगे।

## ➢ सर्वविध जीविका संमता - सप्तोदाहरणी

अ.व - परापरद्वैविध्येन प्रसिद्धायां विद्यायां पूर्वोत्तरयोः उत्कर्षनिकर्षभावनाविद्धानां विपश्चितां समन्वयप्रदर्शनार्थं कार्तवीर्याजुनाय दत्तसद्गुरुः सकलवृत्तिसाम्य -मुपदिशतीति प्रस्तौति, सकलानां विद्यानामनुष्ठानपर्यवसायित्वं प्रशस्य तत्तन्मार्गेषु निषण्णानामुच्चावचत्वं निराकर्तुमारभते निम्नेयमिति।

**निम्नेयं जीविकेत स्समधिक गुणिनी वृत्ति रन्येति भेदो**
**भावो युष्मासु मा भू दुपकरण परा सर्वविद्या विशुद्धा।**
**आमोक्षोत्कर्ष मस्यां कथयति कथया सप्तकृत्वो गुरुर्यः**
**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 61

**द.प्र** – इयं जीविका जीवनविधानगति र्निम्ना नीचा, इतः एतदपेक्षयाऽन्या वृत्तिः जीविका समधिकगुणिनी प्रशस्ततरगुणवतीति भेदः मानावमानरूपो भावः, युष्मासु शिष्येषु मा भूत्। असौ सा च निम्नतया भाव्यमानाऽपि वृत्तिः, यदि मतिः बुद्धिः विशुद्धा अकलुषी चेत्, उपकरणपरा नित्योपकारिणी एव भवति। अस्यामेव वृत्तौ, आमोक्षोत्कर्षं मोक्षपर्यन्तसाधनप्राशस्त्यं, कथया गाधारूपेण सप्तकृत्वः सप्तवारं सप्तोदाहरणीति प्रख्याताभिः प्रसङ्गलहरीभिः, यो गुरुः कथयति, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ बृहस्पत्युपदेशस्य अन्वादेशः

अ.व - विविधशास्त्रविरोधपरिहारं निरूपयितुं, तत्तन्मार्गानुयायिनः पुरुषान् दृष्टान्तयतः दत्तात्रेयस्य उपदेशरूपं शक्रबृहस्पतिसंवादं अवतारयति शुक्रेति।

**शुक्राध्याप्यानुकृष्टै स्सुरगणयुवकै रर्थितो देवदेष्टा**

**अन्या विद्या दिशन् तद्-गत विषयतया गूढ मूचे मघोने।**

**अन्वादिश्याऽऽपवर्गो- पकरणगुणतां योऽपरासां ब्रवीति**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 62

**द.प्र** – शुक्राध्याप्यानुकृष्टैः, शुक्रस्यासुरगुरोः भार्गवस्य, अध्याप्येषु अध्याप्यमानेषु विषयेषु शिल्प सङ्गीत नृत्य काम मन्त्र तन्त्राभिचारादिषु अपरविद्याशास्त्रेषु अनुकृष्टैः समाकृष्टचेतोभिः, सुरगणानां युवकैः अतीतब्रह्मचर्यावस्थैः प्राप्तवयोभिः देवानां तरुणैः, अर्थितः संप्रार्थितः देवदेष्टा देवानामुपदेशको बृहस्पतिः, अन्याः विद्याः पूर्वोपदिष्ट पराविद्यायाः भिन्नाः अपराः विद्याः दिशन् अध्यापयन्, शक्रेण पृष्टः तद्गतविषयतया तास्वपरविद्यासु, अन्तर्वर्तिविषयत्वेन गूढं रहस्यं तत्त्वं, सोपानक्रमेण अपवर्गाप्तिसाधनत्वं मघोने इन्द्राय पुरा ऊचे प्रावादीत्, इत्यन्वादिश्य, पूर्वसंप्रवृत्तं वृत्तान्तमनूद्य, अपरासामपि शिल्पसङ्गीतादि विद्यानामपि अपवर्गोपकरणगुणतां, अपवर्गस्य मोक्षस्य, उपकरणमुपकारः इति गुणः तस्य भावः गुणतां, यो देवः कार्तवीर्याय ब्रवीति स्म तद् ब्रह्मण्यं भजेऽहम्।।

## ➢ शिल्प शास्त्रम् - विधिज्ञः

अ.व - शिल्पशास्त्रनैपुण्यमपि सोपानपरम्परया परमार्थसाधनाय उपयुज्यत इति विधिज्ञं दृष्टान्तयति बह्वीनामिति।।

**बह्वीनाञ्च प्रजानां प्रतिदिन सुलभा ऽऽजीवनायोपयुञ्जन्**

**शिल्पी पुण्यं विधिज्ञः प्रतिफल मृजुना स्वीकरोत्यध्वना स्म।**

**सम्पन्नो नित्यदाना ऽऽर्जित पद गरिमे त्युक्तवान् यो महत्तां**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 63**

**द.प्र-** बह्वीनां प्रजानां कांपिल्यनगरनिवासिनीनामनेकासां प्रजानां, प्रतिदिनसुलभाजीवनाय प्रतिदिनं नित्यं सुलभं सुकरं जीवनम्। तदर्थं आसमन्तं दृढतरगृहादिशालानिर्माणेन पूर्तव्यवस्थापनेन सुखजीवनाय, उपयुञ्जन्नुपकुर्वाणः, विधिज्ञः तन्नामकः कश्चन शिल्पी निर्माणरङ्गनिपुणः, ऋजुनाऽध्वना धर्ममार्गेण प्रतिफलं स्वविहितसेवानां कमनीयं शुल्कं, ततश्च पुण्यमपि स्वीकरोति स्म प्रतिगृह्णाणो जीवति स्म। ततः सम्पन्नः धनिकस्सन्, नित्यं दानेन धर्मशास्त्रोक्तरीत्या पात्रेषु दानेन विधिना, आर्जितगुरुपदगरिमा आर्जितं सम्पादितं पदं गुरोः ब्रह्मणो वा पदं, पदस्य गरिमा गुरुत्वं (यस्य सः), तथाविधः अभूदिति शिल्पिनः महत्तां शिल्पशास्त्रस्य माननीयतां, यो देवो दत्तात्रेयः उक्तवान् प्रबोधयामास तद् ब्रह्मण्यं भजेऽहम्।

## ➢ सङ्गीत काम शास्त्रे - विशालाक्षः

अ.व - इन्द्रियग्राममुपरञ्जयती सङ्गीतकामशास्त्रे अपि, कामोपशमन पूर्वकतया, इन्द्रियार्थातीततत्त्वे मनो निवेशयितु मुपकुर्वाते। तथा च गन्धर्वविद्यया नादोपासनेन भगवत्सायुज्यलाभो भवतीति विशालाक्षदृष्टान्तेन निरूपयति सङ्गीतेति।

**सङ्गीते काम शास्त्रे ऽपरिमितनिपुणो प्राग् विशालाक्ष नामा**

**पत्न्या साकं प्रकामं स्वर गण रसिक स्स्वर्ग गन्धर्व लोकौ।**

**संप्राप्तो ब्रह्मलोकं, त्विय मति महितो - पास्ति रित्यब्रवीद्यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 64**

**द.प्र –**

प्राक् पूर्वं, सुप्रसिद्धे रेवातीरस्थे माहिष्मती नगरे निवसन् विशालाक्ष नामा कश्चन राजकुमारः, सङ्गीते नृत्यवाद्यगानात्मके शास्त्रे, कामशास्त्रे इन्द्रियसुखसाधने वात्स्यायनादिभिरुपबृंहिते च शास्त्रे अपरिमितनिपुणः, गुरुकुलाध्ययनेन स्वमेधया सतीर्थ्येभ्यः सखिभ्यश्च समर्जितविद्यानुभवेन बहुनैपुण्यं लब्ध्वा। स्वधर्मानुसारेणोत्तमां स्त्रियं परिणीय, तया पत्न्या साकं प्रकामं स्वराणां गणेषु राग-तान-मूर्छनादि सङ्गीतप्रकारेषु रसिकः रसं स्वदमानः, देहान्ते स्वर्गं गन्धर्वलोकौ द्युलोकप्रभेदौ सम्प्राप्तस्सन्, ततः तावतिरिच्य, तस्मादपि महत्तरं ब्रह्मलोकं सत्यलोकं लेभे। इयमुपास्तिः आहताऽनाहत-नादोपासना अतिमहिता, सत्यलोकस्यापि आपकत्वादत्यन्तं महीयते, इति यो देवो दत्तात्रेयः अब्रवीत्, कार्तवीर्यद्वारा बोधयामास तद् ब्रह्मण्यं भजेऽहम्।

## ➢ मन्त्र शास्त्रम् - वेदशर्मा

अ.व - ऐहिकप्रयोजनसाधनार्थं मन्त्रतन्त्राणि प्रयुञ्जानस्य वेद शर्मणो दृष्टान्तेन मन्त्रतन्त्रविद्यापारम्यं प्रतिपादयति मन्त्रेति।

**मन्त्रानुष्ठान दक्षो निज तनय शुचा चिन्तितो वेदशर्मा**

**यं भिक्षुव्याजदृष्टं निरुपम वरदं चाऽऽश्रित स्तृण्णरोगः।**

**आत्मीयां मन्त्र सिद्धिं दलितजनकृते स्वर्पयन्नास धन्यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 65

**द.प्र –**

मन्त्रानुष्ठानदक्षः, मन्त्राणामनुष्ठाने दक्षः निपुणः, स्वस्य परेषाञ्च दुःखापनयनाय वाञ्छितार्थसाधनाय च विधीयमानानां मन्त्रराजानां प्रयोगे कोविदः, निजतनयस्य स्वपुत्रस्य शुचा प्रारब्धवशानुभूयमानेन रोगेण हेतुना चिन्तितः सन्तप्तः, वेदशर्मा

तन्नामकः कश्चन श्रोत्रियः, भिक्षुव्याजेन भिक्षोः व्याजेन याचकस्य भावेन (रूपेण) दृष्टं दर्शितात्मीयरूपं यं देवं, निरुपमवरदं औपम्यरहितानां वराणां दानं शीलं यस्य तं, आश्रितः उपशिश्रिये।

तत्प्रभावेण तृण्णरोगः नाशितरोगः बभूव। पश्चात् प्रभो राज्ञाप्रकारेण दलितानां पीडितानां जनानां कृते, आत्मीयां स्वकीयां मन्त्रसिद्धिं मन्त्रानुष्ठानस्य संसिद्धिं, स्वर्पयन् सुष्ठु समर्पयन् लाभनिरपेक्षं समर्पयन् यमाश्रितः कृतकृत्यता मवाप तद्ब्रह्मण्यं भजेऽहम्।

## ➢ स्वधर्म निरतिः - विष्णुदत्तः

अ.व - निष्काम-कर्मानुष्ठान गरिमाणं निरूपयितुं विष्णुदत्त सोमयाजिनं दृष्टान्तयति त्रिरिति।

**त्रिस्सन्ध्या मग्निहोत्रं द्विरनितरमना वेद पाठादि कर्मा-**

**णीजान स्सत्प्रवृत्तो विरहितफलधी श्श्रोत्रियो विष्णुदत्तः।**

**निर्विण्ण स्सन्ननीहो ऽप्यति कुतुकतया यद्दिदृक्षाऽऽतुरोऽभूत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 66

**द.प्र** - सत्प्रवृत्तः, सति ब्रह्मणि प्रवर्तितमनाः, विष्णुदत्तनामकः कश्चन श्रोत्रियो यज्वा, सन्ध्यां सन्ध्योपासनं, त्रिः प्रातः मान्ध्यदिने सायन्तने च त्रिवारं, द्विः प्रातस्सन्ध्ययोः अग्निहोत्रं तन्नामकं नित्यकर्म, तथा च वेदपाठादि कर्माणि वेदचोदितानि स्वाध्यायमुखानि पञ्चमहायज्ञसञ्ज्ञितानि देव पितृ मनुष्य भूत ब्रह्मयज्ञाख्यानि, ईजानः यायजूकः, विरहितफलधीः विरहिता कर्मफले धीः धिषणा यस्य सः, निर्विण्णः विरागः वीतरागत्वादनीहः, ऐहिकामुष्मिक वाञ्छाविहीनस्सन्नपि, अतिकुतुकतया अनल्प-कल्याणेप्सया भार्या प्रेरितः, यद्दिदृक्षाऽऽतुरः, यद्दिदृक्षा यस्य देवस्य दर्शनेच्छा, तस्यां आतुरः नितान्तलाभाभिलाषुकः बभूव तद्ब्रह्मण्यं भजेऽहम्।

## ➢ ब्रह्मराक्षस कृतं प्रतिदानम् (प्रत्युपकारः)

**अ.व** - सर्वजन निपीडकानां रक्षोग्रहपिशाचादीनामपि देवस्य अनुग्रहदायित्वेन परोपकारबुद्धिसम्भवः, तन्मूलकविमोचनमपि सम्पद्यत इति विष्णुदत्तोदन्त मुदाहरति मध्याह्न इति।

**मध्याह्ने वैश्वदेवा- र्पित बलि कणभुग् ब्रह्मरक्षः कृतार्थं**

**शुद्धं कापालिकादि प्रचुर वृषलता ऽसंस्कृतावेक्षितं यम्।**

**दूरात् सन्दर्श्य पुण्यं प्रतिदद दधिकं विष्णुदत्ताय भूयः**[13]

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 67

**द.प्र –**

श्रोत्रियेन विष्णुदत्तेन प्रत्यहं, मध्याह्ने मध्यन्दिने समाचरिते, वैश्वदेवकर्मणि भूतयज्ञापरनामके कर्मणि, अर्पितानां बलिकणानां ओदनस्य बलेः कणानां पुलाकानां, भुक् भुञ्जत् किञ्चित् ब्रह्मरक्षः ब्राह्मणस्सन्नपि समाचरितदुष्कृत्यपर्यवसायित्वेन गृहीतरक्षोजन्मा, स्वीकृतपवित्रौदन बलिजनितया प्रत्युपकारबुध्या श्रोत्रियर्णं प्रत्यर्पयितुं, तन्मनसि च जातां प्रभुदर्शनकांक्षां शमयितुम्। कापालिकादि प्रचुरवृषलताऽसंस्कृतावेक्षितम् - कापालिकादीनां घोरकर्मणां चण्डालानां, प्रचुराऽधिका वृषलता व्रात्यता, तया इत्थंभूतलक्षणया अवेक्षितं, शिष्यपरीक्षार्थं गृहीतनीचवेषकर्माणं, तथाऽपि स्वतः शुद्धमन्तश्शुक्लम्। यं दत्तात्रेयं, भूयः पुनःपुनः त्रिवारं, विष्णु दत्तायोपकर्त्रे श्रोत्रियाय दूरादारात्, सर्वरक्षोविद्राविणः देवस्य सकाशे गन्तुं भीतं सत्, सन्दर्श्य दर्शयित्वा, स्वयं पलायितमपि अधिकं पुण्यमनल्पं सुकृतं, प्रतिददत् प्रतिदाय कृतार्थमासीत्, तद्ब्रह्मण्यं भजेऽहम्।

नीचावस्थासु वर्तमाना अपि जीविनः प्रभोः कृपावशात् आरादुपकारकास्सन्त उत्तरन्तीति निरूपयति गाधैषा।

## दर्शनम् - प्रार्थनम्

**अ.व** - सर्वजीविसमभावनाप्रयुक्तं वैदुष्यं पारोक्ष्येण विष्णुदत्ताय देवेन प्रबोधितमिति कथयति श्वेति।

**श्वा विद्वांश्च श्वपाक स्सकल भुवनगो जन्तु रस्यैव रूपं**

**इत्थं विज्ञान माप्त्रा श्रुति गण विदुषा विष्णुदत्तेन यस्य।**

**सर्वानुग्राह्यबुध्या गृह पितृ करणे भोक्तृता प्रार्थिता च**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 68

**द.प्र** – विचित्रवेषधारिणं दत्तगुरुं समाश्रयितुं त्रिवारं, विहितप्रयत्नेन विष्णुदत्तेन श्रोत्रियेण, श्वा शुनकः, श्वपाकश्चाऽऽहाराय श्वादीन् जन्तून् पचन् चण्डालः, विद्वान् षडङ्गवेदपारगः पण्डितः, ततश्च सकलभुवनगः सकलानि चा तानि भुवनानि च, सकलभुवनानि, तेषु गच्छतीति गः। सप्तम्यां जनेर्डः, अन्यत्रापि दृश्यते - इति ड प्रत्ययः। सर्वस्य जगतः स्थायी, जन्तुः प्राणी सर्वोऽपि, अस्यैव विभोः रूपम्। संस्थानभेदसत्त्वेऽपि एक एव विभुः- इत्थं एवंविधं विज्ञानं अनुभवसिद्धं ज्ञानं, आप्त्रा सम्प्राप्तवता, श्रुतिततिविदुषा श्रुतीनां ततिः विस्तारः, वेदान्तविस्तारस्य विदुषा, स्वाधीनवेदसिद्धान्त बोधितब्रह्मानुभवसम्पन्नेन विपश्चिता, सर्वानुग्राह्यबुध्या सर्वे स्वे स्वे पितरः अनुग्राह्याः, देवेनाऽनुग्राह्याः इति बुध्या मनीषया, गृहपितृकरणे निजगृहे भाविनि पितृणां श्राद्धकर्मणि, यस्य दत्तदेवकर्तृका भोक्तृता निमन्त्रणपूर्वकश्राद्धभोजनकार्यत्वं प्रार्थिता अभ्यर्थिता च, दर्शनसमनन्तरं गृहाऽऽगमन निमित्तत्वेन

भोक्तृत्वमभ्यर्थितमासीदिति पुराणगाथा। विष्णुदत्तेन यस्य भोक्तृत्वं प्रार्थितं, तद्ब्रह्मण्यं भजेऽहम्।

### ➢ श्राद्ध भोजनम्

अ.व - कृत्स्ने पुराणवाङ्मये अपुनरावर्तिनं देवकर्तृकं श्राद्धभोजन प्रसङ्गं प्रशंसति श्राद्ध इति।

**श्राद्धे भुक्त्वा द्विजस्या- नल रवि सहितो विष्णुदत्तस्य पित्र्ये**

**सन्तन्वानो विमुक्तिं पितृकुल निचये कर्म सिद्धान्त दक्षः।**

**कर्मण्यत्वस्य देष्टा वरसुकृतपथं दर्शयन् यः प्रबुद्धः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 69

**द.प्र** – द्विजस्य विष्णुदत्तस्य ब्राह्मणस्य, पित्र्ये पैतृके प्रातिसांवत्सरिकमृताहाख्ये अन्नश्राद्धे, अनलेन गृहपतिनाग्निना, रविणा लोकसाक्षिणा सूर्येण सहितः समेतस्सन्, भुक्त्वा तृप्तिहेतुकं प्राश्य, पितृणां विष्णुदत्तस्य पूर्वजनानामन्येषामपि कुलानां निचये सङ्घाते, विमुक्तिं पितृलोकाद्विमुक्तिं, सन्तन्वानः प्रददानः, कर्मसिद्धान्तदक्षः, समाचरितं कर्मैव सुकृतं दुष्कृतं वा सुखदुःखे सन्दत्त इति, अनूचानस्य सिद्धान्तस्य प्रवर्तको देवः इति भावः।

तादृश कर्मण्वत्वस्य, कर्मणि भवः प्रवृत्तः कर्मण्यः, तस्य भावः कर्मण्यत्वं, तस्य देष्टोपदेष्टा, तेनोपदेशेन वरसुकृतपथं वरस्य श्रेष्ठस्य, सुकृतपथः देवपितृकार्यकरत्वादि पुण्यमार्गस्य दर्शकः दर्शयिता, प्रबुद्धः सर्वब्रह्मात्मकत्वं विजानन्, तथापि लोकसङ्ग्रहार्थं प्रारब्धसङ्क्षयार्थं च जनान् कर्मसु नियोजयन्, यः देवः दत्तात्रेयः भासते, तद्ब्रह्मण्यं भजेऽहम्।

गतजन्मनि कृतानां कर्मणां फलानुभवाय, यमराज्ये पितृलोके वर्तमानान् पितृपितामहप्रपितामहादीन् असंतप्रमीतानन्यांश्च स्वीकृत श्राद्धभोजनेन हेतुनोज्जहारेति, अग्रिमाः उत्तमाः गतीः प्रदिदेशेति च भावो द्योत्यते।

## ➢ विष्णुदत्त द्वारा लोकानुग्रहः

अ.व - निष्कामानुष्ठानपरिणिष्ठितस्य अकामहतस्य श्रोत्रियस्य परमां स्थितिं निर्वर्णयितुं लोकानुग्रहकार्ये, देवेन कृतं विष्णु दत्त नियोजनं द्योतयति निष्कामेति।

**निष्कामानुष्ठितिर्वै सकल बुधनुता साधयेत् सा पुमर्थान्**

**इत्याख्यातुं हि लोके सुगुणमणिमये विष्णुदत्ते प्रशस्तम्।**

**स्वीयं तत्त्वं व्यधायि क्रम दित भवसं-बन्ध मोहञ्च येन**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्ददत्तम्।।** 70

**द.प्र –**

सकलबुधनुता, सकलैः विश्वैः बुधैः विद्वद्भिः नुता सुष्टुता, सा वेदसिद्धान्तप्रसिद्धा, निष्कामानुष्ठितिः निष्कामा निर्गतकामा च साऽनुष्ठितिः अकामानुष्ठानवैखरी, पुमर्थान् पुरुषार्थान् चतुरोऽपि यथायोगं साधयेदित्याख्यातुं प्रकटयितुं, सुगुणमणिमये सुगुणा एव मणयः प्राचुर्येण वर्तन्तेऽस्मिन्निति, विष्णुदत्ते तन्नामके स्वभक्ते लोकानुग्रहकार्यस्य कृते, लोके प्रपञ्चे, प्रशस्तं सुरर्षिभिः संस्तुतं, क्रम-दित-भवसम्बन्धमोहं क्रमेण बोधस्य क्रमेण दितः खण्डितः भवस्य संसारस्य सम्बन्धः अनुबन्धः एव मोहः येन तत् खण्डितसकलमोहं, स्वीयं स्वकीयं तत्त्वं गुरुतत्त्वं, येन देवेन गुरुतत्त्वं व्यधायि विहितं च, तद् ब्रह्मण्यं भजेऽहम्।

यावदायुष्यं भगवत् प्रीतिकरं परोपकरणं कुरुष्वेति स्वीयां तत्त्वावधारणप्रचुरां प्रबलशक्तिं, निरुपमान मन्त्रांश्च श्रोत्रियाय विष्णुदत्ताय प्रोच्याऽनुजग्राहेति भावः।

## ➢ प्रारब्ध कर्म परिपाकः

(धिनिवारणम्दम्पत्योः व्रताचरण पूर्वक व्या)

अ.व - उपात्तदुरितोपशान्तिमकृत्वा स्वस्थतां जनो नैवाप्रानोतीति देवेनादिष्टं कर्मसिद्धान्तप्रबोधं प्रपञ्चयति प्रारब्धायेति।

**प्रारब्धाघ क्षयेण ग्लपयतमिह वा-माधिरोगादि पीडाः**

**एवं शास्त्रोपदिष्ट व्रत विधि चरणे दम्पती संप्रवर्त्य।**

**विप्रारिष्टा न्यहन् यो यजन महिमतो विष्णुदत्तार्चितस्सन्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 71

**द.प्र –**

प्रारब्धस्य जन्मनः उपात्तस्याऽघस्य दुरितस्य क्षयेण नाशेनैव, इह भवदीये क्लेशविषये, वां युवयोः, आधिरोगादिपीडाः आधिः मानसिकक्लेशः रोगः शारीरिक बाधादि बहुविधाः पीडाः अरिष्टानि, ग्लपयतं विनाशयतम्। एवं शास्त्रोपदिष्टव्रतविधिचरणे, शास्त्रेण धर्मशास्त्रेण व्रतानां कर्मविपाकायोपदिष्टानां चान्द्रायणादीनां प्रायश्चित्तानां कृच्छ्राणां, विधेः विधानस्य चरणे समाचरणे, दम्पती कुशावर्त-नगर्यां निवसन्तौ सुमेधाविप्रजम्पती, सम्प्रवर्त्य प्रेरयित्वा कारयित्वा च, यजनमहिमतः श्रुतिपुराण विहितस्य सश्रद्धमाचरितस्य देवपूजादेः महिमतः शक्तिप्राबल्यात्, विप्रारिष्टानि पत्युः विप्रस्यारिष्टानि, सकलदोषान् यो देवः विष्णुदत्तेनार्चितस्सन् दत्तात्रेयः अहन् समहरत्, तद् ब्रह्मण्यं भजेहम्।

## ➢ युक्ति प्रदर्शनम् –

(पिशाचात् कुण्डल विशाला दम्पत्यो रक्षणम्)

**अ.व-** विष्णुदत्तेन प्रयोज्यकर्त्रा भगवदाचरितं भक्तरक्षणं विशदीकरोति विशाला कुण्डलदन्तेन योषित्कांक्षमिति।

**योषित्काङ्क्षा पिशाचं झडिति परभृतं झण्टिकं कुण्डिने प्राक्**

**युक्त्या मन्त्रै र्बबन्धा- वितु मुत तरुणौ कुण्डलं वै विशालाम्।**

**मन्त्रं मन्त्रेण युञ्ज्या- दिति यदुपहितं वेदितं विष्णुदत्तात्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 72

**द.प्र –**

विष्णुदत्तात् निमित्तात् कुण्डिने नगरे, प्राक् पूर्वं, योषित् कांक्षा पिशाचं- योषितः विशालानामिकायाः स्त्रियः कांक्षया वाञ्छया युक्तं पिशाचं, परभृतं परान् बिभर्ति परैः भ्रियते वा, तल्लक्षणघटितं झण्टिकं तन्नामकं, युक्त्योपायेन, मन्त्रैः भूतग्रहोद्वापनमन्त्रोच्चारणादिभिश्च, तरुणौ युवदम्पती, पत्नीं विशालां पतिं कुण्डलं चावितुं रक्षितुं, यः बबन्ध पिशाचमाबन्ध्य तत्पीडायाः मोचयामास।

तथा च मन्त्रेण समालोचनेन, मन्त्रं श्रुत्युक्तं काम्यं चाऽऽभिचारिकादिकं वा, इष्टार्थसिद्ध्यै युञ्ज्यात् प्रयुञ्जीतेति तत्त्वं, यदुपहितं येन देवेनोपहितं तत्त्वं, वेदितं परोक्षेण च बोधितमासीत्, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ वैराग्यम् – भवबन्धभीः

**अ.व-** जन्मान्तराऽऽसादितमात्मानात्मविवेचनं, सत्कर्मविमुखतायै नोपकल्पेतेति लोकसङ्ग्रहोपायं विष्णुदत्तेन प्रायोजितं सप्तमोदाहरणत्वेन निरूपयति योऽतन्निति।

**योऽतन् व्याप्नोति विश्वं स तु किमिह पर स्संसृते र्बन्ध मेति?**

**मा भैषी र्धर्मकर्मा भव तत विरजः प्रव्रजन् मुक्ति मेहि।**

**इत्थं बोधं प्रकुर्वन् द्विजयुवक वरं योऽनुजग्राह शिष्यात्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 73

**द.प्र–** द्विजयुवकवरं कञ्चिद्द्विजयुवकं, तरुणवयस्यपि भवभन्धनभिया कर्मवैमुख्यादवबद्धमिव प्रवर्तमानं, प्रतिष्ठानपुरे निवसतो ब्राह्मणस्य पुत्रं, वरं आत्मानात्मविवेकात् श्रेष्ठम्। द्विजयुवकश्चायं वरश्चेति कर्मधारयः। शिष्यात् विष्णुदत्ताद्धेतोः बोधयन्, किमिति?

यः सर्वान्तर्यामी, विश्वं सर्वं जीविनं अतन् अन्तर्वर्तित्वेन सन्ततं गच्छन्, अनुप्रविशन् प्राणयन् वा, व्याप्नोति विशेषेण सर्वमाप्नोति, सः आत्मा, परः परमः, इह लोकव्यवहारे, संसृतेः लोकसङ्ग्रहायानुष्ठीयमानात् कर्मणः, बन्धमेति निबध्यते किम्? इति प्रश्नोत्थापनपूर्वकं, ज्ञानावाप्तिः कर्मानुष्ठानविघातुकं मा भूदिति संविदं जनयन्, विरजः विगतं रजः मलिनं मानसं रागद्वेषहेतुकं यस्य सः विरजाः। अत्वसन्तस्य चाधातोरिति उपधादीर्घः सर्वनामस्थानत्वपर्युदासेन सम्बुद्धौ न प्रवर्तते। हे विरजः, तत पुत्रक, मा भैषीः मा बिभीहि भीतिर्माऽस्तु, धर्मकर्मा- धर्मः वेदः तत्र प्रोक्तानि कर्माणि यस्य तथाविधो भव। धर्मं चरेति श्रुतिचोदनमनूद्यते।

अनन्तरं लोकसङ्ग्रहणार्थं पितरौ सन्तृप्य, प्रव्रजन् प्रकर्षेण ब्रह्मात्मसंस्थितेरनुभवाय, अरण्यादिकं प्रव्रजन् गच्छन्, मुक्तिं जीवन्मुक्तिमेहि प्राप्नुहि- इत्थं बोधं लोकसङ्ग्रहप्रकारप्रबोधं प्रकुर्वन् संयोजयन्, यो देवः अनुजग्राहानुग्रहीतवान्, तद् ब्रह्मण्यं भजेऽहम्।

जन्मान्तरार्जित-सत्संस्काराः येषु विभान्ति, तान् मुमुक्षून् लोकसङ्ग्रहणे प्रवर्तयन् कर्माण्युपजीव्य, युक्तकाले विदेहकैवल्यमुक्तिं जीवन्मुक्तिं वा यथायोगं संराध्नुयादिति गुरुणा दत्तात्रेयेण बोधित उपदेशः अत्रानुसन्धेयः।

## शास्त्रोपकारः

अ.व- शास्त्राणां वैविध्यं प्रपञ्चयन् तत्साध्यानुपकारान् विशदीकरोति चार्वाकमिति।

**चार्वाकं देह मात्र स्त्वमसि किमधिकं मा रुदेति ब्रवीति**

**शास्त्राण्यन्यानि लोकान् मृति मनु बहुधा वर्णयन्ते ततोऽन्ते।**

**अद्वैतादेव दृश्य भ्रम निरसनता- मोक्ष इत्यब्रवीद्यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 74**

**द.प्र -** चार्वाकं दर्शनं, अनभिज्ञजनरामणीयकं ऐहिकसौख्य पर्यवसायितां अपवर्गस्य प्रतिपादयन्- हे जन, त्वं देहमात्रः असि, शरीरमेतत् संरक्षणीयं गोपनीयं सुखनीयं चेति प्रबोध्य, इतोऽधिकं किं वर्तते?

लोकान्तराप्त्यै मा रुद, दुःखी मा भूः, इति ब्रवीति वक्ति। परलोकप्राप्तये जन्मान्तरसुखाय च प्रयतमानः ऐहिकं सौख्यं नोपेक्षेतेति सुखजीवनं स्मारयत्, चार्वाकमपि दर्शनं किञ्चिदिवोपकरोतीति भावः। एतन्मात्रमेवात्र ग्राह्यम्।

द्वितीयकोट्यां पारलौकिकविषयान्, जन्मान्तरावाप्तिञ्च प्रकथयन्ति शास्त्राण्यन्यानि मृतिमनु निधनानन्तरं, लोकान् सूर्यचन्द्रनक्षत्रग्रहादीन्, तल्लोकावाप्तेः सुकृतनिमित्ततां च बहुधा बहुधा परसहस्रैर्ग्रन्थैः वर्णयन्ते।

ततोऽन्ते तृतीय कोट्यामध्यासस्वरूपं, जगन्मिथ्यात्वं सर्वब्रह्मात्मकत्वञ्च प्रतिपादयतः अद्वैतादेव दर्शनात् उपनिषत्सिद्धान्तात्, दृश्यभ्रमनिरसनतामोक्षः, दृश्ये जगति वस्तुनि सत्यत्वभ्रमस्य निरसनता निरासत्वं, तद्रूपो मोक्षः, अज्ञानापनयन

साध्यस्वरूपानन्दावाप्तिः भवतीति, यो देवो दत्तात्रेयः अब्रवीत् प्रोवाच, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ हस्त मस्तक संयोगः

अ.व - सरहस्यां विद्यामुपदिश्य कार्तवीर्ये विज्ञानसम्पत्तिं विधातुं भगवता प्रयुक्तं प्रकारविशेषमाख्याति ज्ञानमिति।।

**ज्ञानं विद्यार्जनाऽऽदे र्लसतु परिणति र्वृद्ध शुश्रूषया च**

**प्राप्या विज्ञान सम्पद् गुरुवर महिमा-ऽऽधारिणी निश्चिता हि।**

**मूर्ध्नि स्पृष्ट्वा- ऽर्जुनस्य प्रशमितशमलां योगविद्यां य आऽधात्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 75

**द.प्र –**

विद्यार्जनादेः विद्यायाः लोकिक्याः वैदिक्याश्चार्जनं, गुरोस्सकाशात् सम्पादनं तदादिः यस्य विधेः, तस्मात् ज्ञानं लसतु शिष्ये ज्ञानं सम्भवतु नाम। वृद्धशुश्रूषया च विद्यावृद्धानां वयोवृद्धानां गुरुजनानां शुश्रूषया सेवया च, तस्य परिणतिरपि भवतु नाम। प्राप्या - आप्तुं योग्या आप्या, प्रकर्षेण आप्या प्रापणीया विज्ञानसम्पद् - विज्ञानस्य उपार्जितस्य ज्ञानस्यानुभवः, तदेव सम्पत् श्रीः। गुरुवरमहिमाऽऽधारिणी- गुरुवरस्य गुरूणां वरस्य श्रेष्ठस्य महिमा महत्त्वमित्याधारः, गुरुवरमहिमाधारः अस्याः इति तद्धित इनिः। तादृशी विज्ञानसम्पत्तिः गुरुमहिम्नैव सिध्यतीति निश्चिता शास्त्रेष्ववधारिता हि।

अक्षरग्रहणरूपं ज्ञानं गुरोस्सकाशात्, सतीर्थैभ्यः, स्वमेधया च यद्यपि सम्पाद्यते, ततोऽनन्तरं विज्ञानं तावत् सद्गुरोरेव महिम्नः प्रारब्धकर्मादि प्रतिबन्ध-निवृत्तिद्वारेणैव कल्पत इति भावः।

तथा ह्यर्जुनस्य कार्तवीर्यस्य मूर्ध्नि सहस्रारस्थाने स्पृष्ट्वा, करतलेन संस्पृश्य, प्रशमित शमलां प्रशमितानि ऊनीकृतानि शमलानि मलिनानि यया तां, योगविद्यां यो देवः आधात् आदधौ- तद् ब्रह्मण्यम्।

हस्तमस्तकसँयोगेन स्वीयं शिष्यं योगविद्यापरिपूर्णं चकारेति भगवता विहितयोः ज्ञानविज्ञानयोः प्रदानमत्र प्रशस्यते।

## कार्तवीर्यावसानम्

**अ.व** - दृप्तेनापि शिष्येण कृतापराधानविगणय्य, तस्य प्रशस्ततमं निधनं प्रदाय स्वरूपं प्रापयति दे इति भगवतः अपरा मनुग्रहफक्किकां प्रख्याति विद्वानिति।

**विद्वानस्मि प्रभुत्वं मयि हि न तु मद श्श्रेष्ठ एवाह मित्थं**

**देवर्षीन् हेडयन् गो-हरण मलिनकृत् कार्तवीर्योऽवसाने।**

**पश्चात्तप्तोऽथ वीरात् समर भुवि मृतो भार्गवाद् यद्वरेण**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 76

**द.प्र** – अहं विद्वानस्मि, वेदशास्त्रादिपारगो भवामि। प्रभुत्वं भूमण्डलाधिपत्यं मयि मदधीनं वर्तते। मयि मामके मनसि तु मदः गर्वः न न विद्यते। अतः अहङ्कारमतीतः अहमेव श्रेष्ठः त्रिषु लोकेषु सर्वानतिशयितोऽस्मि।

इत्थं मयि मदो नास्तीति मदेन, देवर्षीन् देवानृषींश्च हेडयन् हीनभावेनालक्षमाणः कार्तवीर्यः तन्नामा चक्रवर्ती, अवसाने सन्निहिते मरणसमये (आयुष्यसमाप्तौ) गोहरणमलिनकृत्- गोः सुरभिनामिकायाः धेन्वाः, हरणं बलात्कृत्य स्तेयमिति मलिनं पापं, तस्य कृत् कर्ता। जमदग्नेः ऋषेः आतिथ्यं स्वीकृत्य कृतघ्नस्सन् तदीयां धेनुं बलादाकृष्य माहिष्मतीं नीतवानिति पौराणिकी गाधाऽत्र स्मार्यते।

अथ पश्चात्तप्तः स्वेनाचरितेन मलीमसकृत्येन चिन्तितो भूत्वा, प्रायश्चित्तमर्हन्, समरभुवि रणाङ्गणे, वीरात् परमवीरात् भार्गवात् परशुरामात् निमित्तात्, यद्वरात् यस्य देवस्य वरप्रसादात्, मृतः प्रमीतोऽभूत्, तद् ब्रह्मण्यं भजेऽहम्।

सूर्यमण्डलभेदकत्वादिप्रख्यात- सिद्धिसाधिकां, वीरोचितां मृतिं समरे प्राप्य, पूर्वतनीं विष्णुलोकस्थितिं श्रीहरेः दक्षकरे सुदर्शनचक्ररूपेण संस्थितिं पुनरधिजगाम। एवं प्राक्तनवैभवमाप्तुं दत्तगुरोरनुग्रहेणैव शशाकेति भावः।

## ➢ रेणुका जमदग्नि संस्कारः

अ.व - अवधूतस्येष्टानिष्टभावौ (वन्दमानः पूजक इति रागः, द्विषन् निन्दक इति द्वेषो वा) न वर्तेते इति निरूपयितुं कार्तवीर्यार्जुनसंहर्तुः परशुरामस्य उपाख्यानं प्रस्तोतुं तत्पितृवधादिक मवतारयति दुष्टैरिति।

**दुष्टै राज्ञः कुमारै- स्तपसि परिगते रेणुकेशे प्रमीते**

**मातुर्वै रेणुकायाः पद मनुसरता भार्गवेणार्थितस्य।**

**पित्रो रन्त्येष्टिकर्मा ऽऽचरितु मभयदा यस्य पूर्णा घृणाऽऽप्ता**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 77

**द.प्र –**

समराङ्गणे संहृतस्य राज्ञः कार्तवीर्यस्य, दुष्टैः खलैः कुमारैः बलवत्ता मदोन्मत्तैः युक्तायुक्तविवेकेन हीयमानैः राजपुत्रैः कर्तृभिः, तपसि परिगते तपस्याऽऽचरणे कर्मणि, तपस्समाधिस्थितौ निमग्ने, रेणुकेशे रेणुकायाः परशुराममातुः ईशे पत्यौ जमदग्निमहर्षौ प्रमीते छिन्नशिरसि सति, मातुर्वै रेणुकायाः स्वजनन्याः पदं उपदेशात्मक पदसमूहं वाक्यं, अनुसरता भार्गवेण, स्वस्य पित्रोः मातापित्रोः, खण्डितशिरसः जमदग्नेः तच्चितिं सहजिगमिष्वाः रेणुकायाश्च अन्त्येष्टिकर्म देहसंस्कारकर्म आचरितुमनुष्ठातुं, यस्य देवस्य

दत्तात्रेयस्य गुरोः अभयदा वियोगशोकहेतुक-दुःखभयनिवारिणी, पूर्णा परिपूर्णा घृणाऽनुकम्पा, आप्ता आश्वासनोपदेशवाणी लब्धाऽऽसीत्- तद् ब्रह्मण्यं भजेऽहम्।

विहितनित्याग्निहोत्रकयोः दम्पत्योः देहावसाने सयज्ञियपात्रारणिकस्य शरीरस्य संस्कारार्थमनुष्ठीयमाना चरमेष्टिः, ब्रह्ममेधनाम्ना समुपबृंहितप्रयोगा पितृवाक्यपरिपालकेन परशुरामेण दत्तसद्गुरो सन्निधौ सम्पन्नेति भावः। अवधूतस्थितेः विधिनिषेधातीतत्वात् अन्त्येष्टिकर्म च कारयामासेति, तथा च पूर्वतन शिष्यं कार्तवीर्यं, तत्संहर्तारं भार्गवञ्च सममेवमनुजग्राह रागद्वेषविहीनो देव इति निरूप्यते।

## ➢ क्षत्रिय संहारः - प्रायश्चित्तिः

अ.व- एकविंशतिवारं रक्ष रक्षेति मातुराक्रोशं परिगणयन्, दुष्टराजानां संहारकः परशुरामः, प्रभुं दत्तात्रेयं प्रायश्चित्तार्थमशिश्रिय इति कथयति दीर्घेति।

**दीर्घावध्याधिपत्या- न्मदभरित खल क्षत्रियाणां कुलानां**

**संहर्ता रामनामा भृगुकुल तरणी रुद्रदेवस्य भक्तः।**

**स्वीयाना मागसां सं- परिहरणकृते संश्रितो यं महिष्ठं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 78

**द.प्र –** दीर्घावध्याधिपत्यात्। अधिपतेर्भावः - आधिपत्यम्। दीर्घं चिरकालं अवध्यमप्रतिहतं माधिपत्यं प्रभुत्वम्। तस्मात्, चिरकाल निरूढराज्याधिकारात् हेतोः, मदेन दम्भेन भरितानां पूरितानां खलानां दुष्टानां क्षत्रियाणां हैहयादीनां कुलानां तत्सम्बन्धिनां निरङ्कुशपालकानां लोककण्टककल्पानां वंशानां संहर्तोन्मूलकः, भृगुकुलतरणिः भृगुवंशस्य सूर्य इव प्रकाशकः, रुद्रदेवस्य भगवतः सदाशिवस्य भक्तः अनुग्रहभाक्, रामनामा रामेति नामा ब्राह्मणो युवा, स्वीयानां स्वेनाचरितानामागसां

किल्बिषानां, साध्वसाधुविवेकराहित्यसम्भृत सर्वक्षत्रियवधारूपाणां पापानां, संपरिहरणस्य कृतेऽपनयने, यं महिष्ठं पूज्यतमं संश्रितः समाश्रयणपरो बभूव, तद् ब्रह्मण्यं भजेऽहम्।

➢ **प्रायश्चित्तोपदेशः**

**अ.व** - कृतानामेनसामपाकरणं पश्चात्तापमूलकमेवेति बोधयता भगवतोपदिष्टं प्रायश्चित्तयज्ञोकर्मोदन्तं प्रस्तौति कर्तव्येति।

**कर्तव्या धर्मरक्षा परमपि तदितो जातिवैरं न कार्यं**

**पश्चात्तप्तेन साध्या ह्यघ निचय हति स्साऽपि यागेन चैव।**

**सम्बोध्यैवं स्वयं यो यजनविधि ततिं कारयामास रामं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 79

**द.प्र –**

धर्मरक्षा धर्मस्य वेदचोदितसिद्धान्तरूपस्य रक्षा परिरक्षितिः कर्तव्या अवश्यमनुष्ठेया। तद्विघातुकानां निग्रहश्च कर्तव्यः। परमपि परन्तु, तदितः इतः परं, जातिवैरं पापकृन्मनुष्यस्य जात्याः विषये वैरं शत्रुत्वं, न कार्यं न करणीयम्।

प्रारब्धवशात् तादृशं जातिनिर्मूलनं यदि कृतञ्चेत्, तत् अघनिचयहतिः तेषां अघानां पापानां निचयस्य समूहस्य हतिरुपशमनं, पश्चात्तप्तेन पापकरणात् पश्चात् शोचनरूपतापेनैव, साध्या भवति। साऽपि प्रायश्चित्तिः यागेनैव धर्मशास्त्रविहित यज्ञानुष्ठानेनैव सिध्यति।

एवं सम्बोध्य सम्यक् बोधयित्वा, रामं भार्गवं (प्रयोज्यकर्तारं), यजनविधिततिं प्रायश्चित्तियागस्य विधीनां विस्तारं, यः देवः कारयामास अनुष्ठापयामास, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ यज्ञ दीक्षा

अ.व - दत्तात्त्रेयप्रयोजितस्य यज्ञकर्मणः नियमसाधारण्यविरोधाऽऽभासरूपां वैचित्रीं चमत्कुरुते चित्रेति।

**चित्रा कर्माऽऽदि दीक्षा-ऽस्खलित नियम भाग् ब्रह्मचारी तु रामः**

**आचार्यत्वं गृहीतं विधि तदितरता ऽतीत तत्त्वेन येन।**

**मौनीशा स्सुष्ठु दीक्षा प्रमुदित मनसो ऽभांश्च यत्सन्निधाने**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 80

**द.प्र –**

कर्मादिदीक्षा - दत्तात्रेयेण प्रयोजितस्य, परशुरामेण प्रयोज्यकर्त्रा अनुष्ठापितस्य प्रायश्चित्तयागकर्मणः, आदौ भवा दीक्षा, चित्रा साधारणनियमेभ्यः बहिर्भूताऽदृश्यत।

अत्र रामः यजमानस्थानीयः परशुरामस्तु, ब्रह्मचारी अनुदूढः अर्थादपत्नीकः। अस्खलितनियमभाक्- न स्खलिताः उल्लङ्घिताः नियमाः ब्रह्मचर्याश्रमनियमाः, तान् भजतीति। अनधिकारिणो याजनदोषाभासस्य वैचित्री द्रष्टव्या अयज्ञो वा एषः, योऽपत्नीक- इति अपत्नीकयज्ञस्याऽऽक्षेपक श्रुतेः।

विधि-तदितरताऽतीततत्त्वेन- विधयः आध्वर्यवप्रयुक्ताः यागनिर्वाहकविधयः, तदितरे सर्व ऋत्विक् ब्राह्मण निषेधरूपाः, विधिनिषेधानां भावः विधितदितरता, तामतीतं तत्त्वं यस्य, विधिनिषेधानतिक्रान्त इति यावत्। तादृशेयन येन दत्त देवेन आचार्यत्व मस्मिन् यज्ञकर्मण्याध्वर्युत्वं, गृहीतम् स्वीकृतमङ्गीकृतं वा। कदाचिदन्तर्हितः, अन्यथा तिरोहितः, असकृदन्तर्मुखः ध्यानदृष्ट स्समाहितो वा दत्तात्रेयः, क्वचित् क्वचित् प्रतिप्रस्थात्रादीन् ऋत्विजो नियम्य, यजति स्म इत्यपरा वैचित्री। पुनश्च मौनीशाः मुनिश्रेष्ठाः कश्यपाद्याः, यत्सन्निधाने यस्य देवस्याऽऽध्यक्षे, दीक्षाप्रमुदितमनसः प्रवृत्तायां

दीक्षायां प्रमुदितानि मनांसि येषां तथाविधाः, नितान्त-तुष्टमानसाश्च, सुष्ठु अतिशयेन अभान् प्रेरेजिरे, तद् ब्रह्मण्यं भजेऽहम्।

लोकदृष्ट यज्ञनियमातिक्रमभ्रान्तिमत्सु केषुचिदपि मुनिषु सत्सु, असाधारण विशेषशास्त्रनिपातन बलेन सुसम्पन्ने विधौ (मखे), गृहीतार्त्विज्याः महर्षयः भगवत् सन्निधान सौभाग्यात् प्रमुमुदिरे। यजे त्सौत्रामण्या मपत्नीकोऽप्यसोमपः। मातापितृभ्या मनृणार्थी द्यजे-ति वचना च्छ्रुतिरिति तस्मा त्सौम्यँ याजयेत् - इत्यैतरेयं ब्राह्मणवाक्यमत्र विरोधपरिहारर्थकं विशेषशास्त्र- मित्यनुसन्धेयम्।

## ➢ यज्ञ महिमा

अ.व - परशुरामकर्तृक यागमहिम्नः पारम्यं प्रशंसति अर्क्यैतेति।

**अर्क्यैतैत न्महेज्या महिम सुगुणता कीदृशीति ब्रवाम?**

**आचार्य स्त्वद्वितीय स्त्रिभुवन गरिमा चर्त्विजो ब्रह्मनिष्ठाः।**

**यज्वा हर्यंशजात श्श्रुतिशिरसि लस- द्ब्रह्मवाद्यं यदीयं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 81

**द.प्र –**

परशुरामेण प्रवर्तितो महायज्ञः कथम्भूत इति- अर्क्यैत हि स्तूयेत हि। अर्क स्तवने धातोः, कर्मणि यगन्तात्, विधिलिङो रूपम्। एतस्याः महेज्यायाः महायागस्य, महिमसुगुणता महिम्नः, महत्त्वस्य सुगुणता च कीदृशी कथम्भूतेति ब्रवाम वदाम।

अत्राऽ चार्यस्त्वु अध्यक्षप्रयुक्तमुपदेशं निर्देशनं वा तन्वानः, अद्वितीय त्रिभुवनगरिमा - नास्ति द्वितीयं यस्य तदद्वितीयः। त्रयाणां भुवनानां समाहारः त्रिभुवनं, तत्र त्रिभुवने गरिमा। अद्वितीयः त्रिभुवनगरिमा यस्य सः श्री दत्तदेवः। अनितरसाध्य लोकत्रय गुरुपदभाक् विराजते।

ऋत्विजश्च यज्ञक्रियानिष्पादकाः पारिपार्श्वकाः श्रोत्रियाश्च, ब्रह्मनिष्ठाः ब्रह्मणि विषये श्रवणमनननिदिध्यासनरूपेण परिनिष्ठिताः विलसन्ति स्म। एवञ्च यज्वा यजमानः भार्गवस्तु साक्षात् हर्यंशसञ्जातः, विष्णोरवतारत्वेन प्रकाशते।

एवं क्रतुसमये, यदीयं येन देवेन प्रवर्तितं, ब्रह्मवाद्यं ब्रह्मविषयकं प्रसङ्गजातं, श्रुतिशिरसि श्रुतीनां वेदानां मूर्धनि उपनिषदि, लसत् भासते स्म- तद् ब्रह्मण्यं भजे। सूक्ष्मबुद्धीनां महर्षीणां गोष्ठी ब्रह्मणि पर्यवसीदन्ती मन्दमध्यमाधिकारिणामपि सकलविधसंशीतिपरिहाराय युज्यते स्म। सर्वोपनिषत्प्रतिपादित जीवब्रह्मैक्यानुसन्धानविज्ञान विभववितारकं तत् सत्सङ्गसदो लसति स्मेति भावः ।

- **ब्रह्मवाद्यम्**

अ.व - यज्ञानुष्ठानलक्ष्यभूतं प्रयुज्यमानमन्त्रार्थानु सन्धानपर्यवसायि ब्रह्मोद्यं भगवत् सन्निधाने प्राचारीति श्लोकेनान्यतमेन च प्रस्तूय तत् प्रयोजनं विशदयति वक्ता चेति।

**वक्ता चेत् सर्वविज्ञः प्रभु रखिल विदां गूढतत्त्वाऽऽस्पदं किम्?**

**श्रोतारस्सर्व शास्त्रो- न्मथन परिणता ब्रह्मयज्ञो निमित्तम्।**

**निस्सन्दिग्धं समस्तं जडमतिषु सुधी र्यत्प्रभावा न्मखेऽभूत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 82

**द.प्र –**

क्रतुसदसि प्रवर्तिते ब्रह्मोद्ये, वक्तोपदेष्टा, अखिलविदां समस्तज्ञानानां प्रभुः सर्वविज्ञः। अपरोक्षीकृतविज्ञानसाकल्य सम्पन्नो भवति चेत्, तत्र गूढतत्त्वास्पदं रहस्यतत्त्वस्याऽवकाशः, किमपि भवति? सर्वाणि जटिलानि रहस्यान्यपि सुखेन प्रकाश्यन्त इति भावः।

यथा वक्ता सर्वज्ञः, तथैव श्रोतारश्च परिपक्वाः इत्यपरेण पादेन प्रशस्यते। श्रोतारः, ब्रह्मोद्ये प्रष्टारः अन्ये च सदस्याः, सर्वशास्त्रोन्मथनपरिणताः- कृत्स्नस्य वेदराशेः षण्णामङ्गानां दर्शनानां चोन्मथनेन क्षोदक्षमपाण्डित्यसम्पादनेन परिणताः चतुर्धा सम्पन्नविद्याः राराजन्ते स्म ह। आचार्यात् पदमादत्ते पादं शिष्य स्स्वमेधयाष पादं सब्रह्मचारिभ्यः पादं कालक्रमेण हि - इति चतुर्धा सम्पादनं विद्याया स्स्मृता।

एतस्य सन्निवेशस्य निमित्तं तु ब्रह्मयज्ञः ब्रह्मज्ञानसम्पादको यज्ञः। ततस्समस्तं प्रसङ्गसर्वस्वमपि निस्सन्धिग्धं असंशयं सञ्जातम्। जडमतिषु मन्दबुद्धिष्वपि सुधीः शोभना धीः उपपत्तिक्रमसहित सिद्धान्ताऽभ्युपगम- शक्तियुक्ता बुद्धिः, यत् प्रभावात् यस्य दत्तात्रेय स्वामिनः प्रभावात्, सन्निधानमात्रवैशिष्ट्यादेव, मखे तस्मिन् परशुराम कर्तृकयज्ञेऽभूत् सुकरं समपद्यत, तद् ब्रह्मण्यं भजेऽहम्।

## ➢ सन्ध्या तत्त्वम्

अ.व - भगवतानुष्ठीयमानां सन्ध्योपासनरीतिं विशदयति सन्ध्योपास्ताविति।

**सन्ध्योपास्तौ निषण्ण स्सुरमुनि निवहा- गोचर स्सन्नमेयः**

**सुत्याहे यज्ञदीक्षा प्रचरण समये यस्तिरोऽभू न्महात्मा।**

**पश्चादेत्य प्रवक्ता प्रकृति विकृतिम त्सान्ध्यतत्त्वं सभायां**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 83

**द.प्र** – यः दत्तात्त्रेयः सद्गुरुः, सन्ध्योपास्तौ सन्ध्यायाः उपासने निषण्णः अवस्थितस्सन्, सुरमुनिनिवहाऽगोचरः- सुराणां देवानां मुनीनामृषीणाञ्च निवहानां समूहानामगोचरः अदृष्टो भूत्वा, अमेयः स्वीयगतिविशेषं केनचिदपि मातुमशक्यः। यज्ञदीक्षाप्रचरणसमये परशुरामप्रवर्तित महायज्ञस्य दीक्षायाः प्रचरणस्य समये दीक्षाकाले, तिरोऽभूत् हठादन्तर्हितो बभूव।

पश्चात् कञ्चित् कालमतीत्य, एत्य पुनस्सदोमण्डप मागत्य, प्रकृतिविकृतिमत् सविशेष निर्विशेष भेदद्वयात्मक संस्थानवत् सान्ध्यतत्त्वम्। सन्ध्यायां भवं भासमानं सान्ध्यं, चेदं तत्त्वं च सान्ध्यतत्त्वं, प्रवक्ता प्रकर्षेण वदिता प्रवाचकश्च रेजे - तद् ब्रह्मण्यं भजेऽहम्।

अहोरात्रयोस्सन्धिकालेऽनुष्ठेयपदार्थत्वेन विहिते सन्ध्योपासने संप्रवृत्त इवावलोकितस्सन्, तथैवान्तर्हितमूर्तिः दत्तः, देवर्षिदृष्टि गवेषणेनाप्यनवाप्ततत्त्वः व्यराजतेति भावः। ततश्चाविष्कृत निजरूपस्सन्, मतिगतिविवरे निश्चलस्थायिनि विलसन्निर्बीजब्रह्मणि लय एव सन्ध्योपासनास्वारस्यमिति बोधयामासेति प्रसङ्गश्चात्रानुसन्धेयः। प्रकृतौ निश्चलं ब्रह्म संस्पृष्टमायिकं सत् विकारतामाप्य भूतभौतिकादि व्यवहारमध्यासेन भजत इति बोधोऽप्यत्र पर्यवस्यते।

## ➢ पिङ्गल नागः – मोक्षः

अ.व - अज्ञानकार्यभूतसर्वशंसीतिपरिहारद्वारा साक्षादपवर्गप्रदायको भगवानिति निरूपयितुं मुनिकुमारकं पिङ्गलमुदाहरति निश्चेतुमिति।

**निश्चेतुं शक्यमेवं न च तदितरधा यस्य सत्त्व न्तदस्य**

**ज्ञीप्सायाश्चित्र चर्या-ऽवगुण सुगुणता भ्रान्तिमान् पिङ्गलोऽभूत्।**

**मोक्षेच्छुं स्वे शिवेऽङ्गे निहित विद मभुं यो विलीनं चकार**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 84

**द.प्र -**

यस्य गुरोः देवस्य सत्त्वं प्रकृतिः, एवं भवति, न चैवं तदितरधा तद्भिन्नत्वेन भवतीति निश्चेतुं निर्णेतुं न शक्यम्। बहुश्रुतार्थैरपि निष्कर्षेण प्रवक्तुं दुस्साध्यं भवति। एतत् तदित्यनिर्देश्य मिति यावत्।

तदस्य महतोऽनिर्वाच्यतत्त्वस्य ज्ञीप्सायाः, यज्ञसमयिक चेष्टितस्य गूढार्थं बुभुत्सुः, चित्रचर्याऽवगुण सुगुणता भ्रान्तिमान् - तस्य चित्राणां चर्याणां दुरूह्याणां भगवल्लीलाकृत्यानां, अवगुणाश्च सुगुणाश्च अवगुणसुगुणौ, तयोः भावः सुगुणता, तस्याः तद्विषयिणी भ्रान्ति रस्येति। भगवल्लीलाकृत्यानां सौगुण्य वैगुण्य विवेचन विषये असमर्थ स्सन्न्, अनुसर्तृं वर्षिष्ठ मुनिबृन्द विहित महादरेण च सञ्चकितः पिङ्गलः तन्नामकः कश्चन ऋत्विङ्मुनियुवाऽभूदासीत्।

तथाविधममुं जिज्ञासुं मोक्षेच्छुं मोक्षस्य विषये इच्छुकं मुमुक्षुं, निहितविदं कटाक्षप्रसृत दयावशेन निहिता वित् यस्मिन् तं, विहित विज्ञानं कृत्वा, स्वे स्वीये अङ्गे परिवृद्धमहाशरीरे, शिवे शिवलिङ्गाकारे शिवमये वा विलीनञ्चकार। यो वाञ्छित मोक्षप्रदानाय स्वात्मनि विलापयामास, सद्योमुक्ति मनुजग्राह, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ यज्ञ तत्त्वम्

अ.व - श्रुतिशीर्षोपदिष्टं यज्ञकर्मणः ज्ञानमयत्वं प्रबोधयति पत्नीति। शरीर व्यापारसाध्ये यज्ञकर्मणि युज्यमानं तत्त्वबोधं सर्वे याज्ञिकाः सङ्गृह्णीरन्निति ज्ञानयज्ञप्रकारः निर्वर्ण्यते।

**पत्नी श्रद्धा तु यज्वा सतनुरपि भवे- द्यज्ञसम्भारभाग्घि**

**मन्युं कृत्वा पशुं यद्बलि मिह ददते ज्ञानयज्ञ स्स यस्मात्।**

**विद्वद्भि श्चाध्यगीष्ट क्रतुविधि समये यज्ञ सिद्धान्त सारः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 85

**द.प्र –**

श्रद्धा अनन्यगामिनी बुद्धिसँयुक्तिः पत्नी यजमानस्य पत्नीस्थानीया भवति। आत्मरूपी यज्वा यजमानः, सतनुः स शरीरोऽपि यज्ञसम्भारभाक् यज्ञस्य क्रतोः संभाराः सामग्र्यादयः तान्भजति सेवते। भजोऽण्वि रिति ण्वि प्रत्ययः। शरीर मिध्म मुरोवेदिः

इत्यादि श्रुतिचोदितलक्षण प्रकल्पनाऽत्र सन्धेया। ज्ञानयज्ञे प्रवृत्तस्य विदुषः बहिरङ्ग-साधन मनपेक्षित मिति सर्वाऽपि याज्ञिकी संभारक्रिया समाख्या, अन्तरङ्ग एव संभाव्यते।

इह ज्ञानयज्ञे मन्युं क्रोधं पशुं कृत्वा आलम्भनीयं यूपबद्धं पशुं कृत्वा यद्बलिं ददते, संज्ञपनं कुर्वते विद्वांसः, स एव ज्ञानयज्ञ- इति। यस्मात् तत्त्वबोधने आख्यातुः प्रवक्तुः अध्यापकात् दत्तात्रेयात् निमित्ताद्विद्वद्भिः संप्रतिपन्नवेदार्थैः मुनीश्वरैः, क्रतुविधि समये परशुराम कर्तृके क्रत्वनुष्ठानकाले यज्ञसिद्धान्त सारः क्रमराद्धान्त बोधः अध्यगीष्ट भूयोऽप्यधीतमासीत्, तद्ब्रह्मण्यं भजेऽहम्।

यस्मदित्यत्र अपादान संज्ञा, आख्यातोपयोगे इति सूत्रेण प्राप्यते। उपयोगे नियमपूर्वक विद्याग्रहणे आख्याता अपादान संज्ञको भवतीति शास्त्ररूढिरत्र चरितार्था।

- **अभ्युपगमः**

अ.व - सर्वेषां यागानामनुष्ठानेन परंपरया साधनीयं ब्रह्मज्ञान मेवेति गुरुपदेशं सङ्गृह्णीते ब्रह्मज्ञानेति।

**ब्रह्मज्ञानापकं य- न्मख निहितमिदं गूढ तत्त्वं प्रकृष्टं**

**जानीता न्नित्य यज्वा भवतु च सकलो धर्ममार्गावलम्बी।**

**इत्येवं ख्यापयन् यः क्रतुगति मुदितो नित्य सँयायजूकः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 86

**द.प्र –**

मखनिहितं मखे यज्ञे क्रतुविधाने, निहितं श्रुतिवाक्येषु नितरां हितं अवस्थितं, यत् प्रकृष्टं प्रशस्तं गूढतत्त्वं प्रच्छन्तं तत्त्वं आस्ते, तद्धि ब्रह्मज्ञानापकं ब्रह्मणः निर्विशिष्ट परब्रह्मणः ज्ञानस्यापकं बोधकं पर्यवस्यति। इति इदं सत्यं जानीतात् कर्मण्यः जनः जानातु।

एवञ्च सकलः सर्वोऽयजमानोऽपि, धर्ममार्गावलम्बी धर्मस्य श्रुतिचोदनालक्षितस्य मार्गं अवलम्बमानः, यज्वा यजमानः भवतु संपद्यताम्।

यज्ञकर्मणि प्रवृत्ताः कर्मण्याः तन्निष्ठं स्वारस्य माकलय्य ब्रह्मण्या भवन्त्विति, तादृश यज्ञकर्मस्वप्रवृत्ता अपि तन्महिमानं वित्त्वा कर्मण्याः भूयासुरिति भावः। एवं ख्यापयन् लोके प्रकथयन् स्वयं न्नित्यं संयायजूकः सदा सम्यगाभीक्ष्ण्येन ब्रह्मयज्ञे सन्निविष्टः, क्रतुगतिमुदितः क्रतोः परशुरामानुष्ठितस्य यज्ञस्य गत्या प्रक्रमणेन मुदितः सन्तुष्टचेताः यो बभूव। तद्ब्रह्मण्यं भजेऽहम्।

- **यज्ञ समाप्तिः**

अ.व- अनिदंपूर्वरीत्या प्रवृत्तस्य यज्ञस्य पारणं (कर्मसमाप्तिं) वर्णयति यस्येति।

**यस्याऽऽध्यक्ष्ये प्रतिष्ठां प्रसभ मुपनिष- त्सार सर्वस्व विद्या-**

**संवीतो भार्गवस्य क्रतु रवभृथ प-र्यन्ततां प्राप पूर्णः।**

**कृत्स्ना पृथ्वी प्रदत्ता सपदि च मुनये सार्णवा कश्यपाय**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 87

**द.प्र –**

यस्य दत्तात्रेयस्य आध्यक्ष्ये अध्यक्षतायां दिव्यसन्निधाने, भार्गवस्य भृगोः गोत्रापत्यस्य परशुरामस्य क्रतुः महायागः, उपनिषत्सारसर्वस्व विद्यासंवीतः- उपनिषदां श्रुतिलतान्तानां सारस्य बलस्य, सर्वस्वमेव विद्या ब्रह्मप्रापकत्वेन परा विद्येति प्रख्याता, तया संवीतः, अजस्त्र प्रचरित ब्रह्मोद्य परंपरया सङ्गतः, पूर्णस्सन्, अवभृथपर्यन्ततां - क्रतुचरमाङ्गभूतः अवभृथः तेन पर्यन्ततां प्रतिष्ठां परावाप्तिरूपां सुप्रतिष्ठां प्राप अभ्यगमत्। सोऽयं क्रतुः समाप्तिं प्रसभं बलेन उपयातः।

प्रसभमित्यत्र, महति यज्ञकर्मणि विलीनमानसैः ऋत्विग्भिः, कर्मसमापनमनिच्छद्भिरपि कर्मलोपं व्यावर्तियितुं मनोबलेन क्रतुः परिपूर्तिं निन्ये। अथवा भा दीप्तिः, तया ब्रह्मवाद दीप्त्या सह वर्तत इति सभा। प्रकृष्टा सभा यथा भात्यस्मिन् न्तथेति अव्ययीभावः प्रसभमिति शब्दः।

एवं सुसंपन्ने क्रतुविधौ, सार्णवा अर्णवैः समुद्रैः सहिता कृत्स्ना पृथ्वी समस्ता भूः कश्यपाय तन्नामकाय प्रजापतये (मुनये) च दक्षिणात्वेन सपदि शीघ्रं लोभराहित्यान्निष्कामत्वाच्च झटिति परशुरामेण प्रदत्ता, स्वस्वत्व-निवृत्तिपूर्वक परस्वत्वोत्पादिता यस्याध्यक्ष्ये पृथ्वी अभूत्, तद्ब्रह्मण्यं भजेऽहम्।

यज्ञ आयुष्मान् दक्षिणाभिः इति श्रुतिबलेन, महतो यज्ञस्य महती दक्षिणा न्याय्येति, भगवतः आध्यक्ष्ये अवसितकामनासर्वस्वो भार्गवः स्वस्य कृते गोष्पदमात्रामपि भुवं अनवशिष्य, कश्यपाय प्रादादिति विशेष स्स्मर्तव्यः। अत एव काश्यपी क्षितिरिति प्रसिद्धिः, तथा च अप्रज्ञातगोत्राः द्विजातयः स्वीयं काश्यपगोत्रमिति समामनन्तीति आचारो लोके प्रवर्तते।

## ➢ उपदेशः

अ.व - सर्वशक्तस्य महात्मनोऽपि गुरूपदेश एव वरणीय इति ज्ञापयितुं परशुरामाचरितां गुरूपसत्ति मुदाहरति आप्यमिति।

**आप्यं सर्वं समाप्तं तदपि च विदितं यत्तु वेद्यञ्च लौक्यं**

**आप्तव्य स्तूपदेशो गुरुमुख गलितो यो हि शान्त्या निदानम्।**

**इत्यध्याहार्य रामः प्रसृति करपुटो यं गुरु श्चोपसन्नः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 88

**द.प्र –** आप्यं प्राप्तुं योग्यं सर्वमपि समाप्तं अधिगतं, यत्तु लौक्यं जगत्सम्बन्धि ज्ञानं वेद्यं वेत्तुं योग्यमिति प्रथितं यद्वर्तते, तदपि च विदितमेव। इह लोके अवाप्यश्च न किञ्चिदवशिष्टः। इतः परं गुरुमुखगलितः गुरोर्मुखात् निस्सृतः, शान्त्याः चित्तवृत्तीनां शमनस्य निदानं आदिकारण मित्यभिहितः, यो गुरुमुखगलितः उपदेशः, स एव आप्तव्यः अवश्यं प्राप्यः। इति अध्याहार्य अवधार्य, रामः परशुरामः सह्याद्रौ दत्ताश्रमे, प्रसृति करपुट स्सन् अतिशयितादरात् प्रसृतियुतयोः करयोः पुटम् यस्य सः, घटिताञ्जलि स्सन्न् यङ्गुरुं दत्तदेवं उपपन्नो बभूव उपससाद, तद्ब्रह्मण्यं भजेऽहम्। कर्तव्यं समस्तं निरुह्य, गुरूपदेशवाक्यानि समवलम्ब्य, परमार्थाय प्रयतेतेति दृष्टान्तो बभूवेति भावः।

## ➢ त्रिपुरा रहस्यम्

अ.व – परशुरामनिमित्तेन भगवान् दत्तात्रेयः श्रीविद्या रहस्यं, त्रिपुरा रहस्यनाम्ना आविश्चकारेति कथयति श्रीमातेति।

**श्रीमातैव स्वमाता प्रकृतिरपि परा रेणुका वैकृतेति**

**यस्योक्त्या भार्गव स्सञ्चकित इव परा तत्त्व संप्रार्थनेन।**

**श्रीत्रैपुर्या रहस्यं परम मसुलभं येन चाध्यापितोऽभूत्**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्ददत्तम्।।** 89

**द.प्र –**

स्वमाता निजजननी रेणुका तन्नाम्नी साध्वी, श्रीमातैव मूर्तविद्येति। सैव प्रकृतिः अव्यक्ता अव्याकृतावस्थायां स्वरूप लक्षण समन्विता मूलप्रकृतिरिति। वैकृता जीवसिसृक्षादि लीलया स्थावरजङ्गमादि स्रष्ट्री, तदनुप्रवेष्ट्री च विलसतीति। यस्य दत्तात्रेयस्य सद्गुरोः उक्त्या प्रवचसा हेतुना भार्गवः रामः सञ्चकितः विस्मित इव बभूव।

ततोऽधिकं परातत्त्वसंप्रार्थनेन, परायाः शक्त्याः तत्त्वस्य संप्रार्थनेन पराविद्यालाभाय विहितेन प्रार्थनेन, असुलभं दुर्लभं परमं परतमं, श्री त्रैपुर्याः स्थूल सूक्ष्म कारणाख्य पुरत्रयाधिष्ठितायाः।

यद्वा भूर्भुवस्सुवरिति लोकत्रयाश्रयिण्याः, श्रीमातुः रहस्यं गूढं ज्ञानं श्रीत्रिपुरारहस्य नामकं सुज्ञानविशेषञ्च येन सद्गुरुणा परशुरामः, अध्यापितः शिक्षितः अभूत्, तद्ब्रह्मण्यं भजेऽहम्।

- **प्रत्यभिज्ञानम्**

अ.व- शक्तिविशिष्टाद्वैतमित्यनर्थान्तरं प्रत्यभिज्ञावादं दत्तात्रेयवचोभिः अवतारयति सर्वव्याप्त्रीति।

**सर्वव्याप्त्री चिदेषा तदधि गतिमतो जीविनः पश्य तत्र**

**शक्तिं विश्वा मवेया स्सकलपरिगतां प्रत्यभिज्ञान मेतत्।**

**सृष्टिव्यापार हेतु र्गुणिषु गुणसुधा स्सेति येनोपदिष्टं**

**तद्ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 90

**द.प्र**

हे भार्गवराम- एषा सर्वजीविभि रनुभूयमानत्वेन प्रसिद्धा चित् चैतन्यरूपिणी चिच्छक्तिः, सर्वव्याप्त्री सर्वमणुगुण मभिव्याप्य सुस्थिता वर्तते। तत्र लोकत्रितय्यां तदधिगतिमतः तस्याः चितः अधिगतिः प्राप्तिः विष्टिः येष्विति तदधिगतिमन्तः जीविनः भवन्ति, तान् चित्कला विलास परिपुष्टान् तदधिगतिमतो जीविनः, सर्वत्र पश्य। सर्वव्यापक चैतन्य दर्शन मभ्यसेति यावत्।

सकलपरिगतां ब्रह्माण्डपिण्डाण्डान् परितः संव्याप्य गतवतीं विश्वां विश्वरूपां शक्तिं त्वं अवेयाः अवगम्याः। अवपूर्वकात् इण् धातोराशीर्लिङि सिप्। एतदेव प्रत्यभिज्ञानं नित्यशुद्धबुद्धमुक्तपरिपूर्णचितः दर्शनं भवति।

बुद्ध्यवच्छिन्नज्ञानेन नूतनतया प्रमेयं प्रमातुः नोत्पद्यते। शाश्वतिकमेव ज्ञानं प्रतिबन्धनिरासद्वारा, प्रमाता प्रतिपद्यत इति तन्नित्यत्यं घटते। प्रमातुः प्रतिबन्धकारणेन दर्शनान्तरायेऽपि प्रमेयन्तु सुस्थितमेवेति स्वारस्यञ्च द्योत्यते।

सैव चिच्छक्तिः सृष्टिव्यापारहेतुः। सृष्टिशब्दः ब्रह्मविष्णु महेश्वरेशान सदाशिव व्यापारोपलक्षकः। सृष्ट्यादि व्यापाराणां हेतुः मूलकारणं भवति। सैषा चिच्छक्तिरेव, गुणिषु गुणवत्त्वेन कथ्यमानेषु सर्वसत्त्वेषु गुणसुधाः गुणानां सुधाः सुष्टु दधातीति सुधाः। गुणानाधाय सन्धाय पोषयतीति, येन दत्तसद्गुरुणा भार्गवाय उपदिष्टं प्रबोधित मासीत्, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ श्रीविद्या सम्प्रदायः

अ.व - महाविद्येति सुप्रसिद्धां बुधजनै राद्रियामाणां दत्तसद्गुरु संप्रवर्तितां श्रीविद्यां प्रस्तौति जन्मन्यस्मिन्निति।

**जन्मन्यस्मिन् परस्मिन् द्वितय फलयुतो जामिताशून्य पन्थाः**

**श्रीविद्या सम्प्रदाय स्सम मुभयविधो दक्ष वामादि तन्त्रः।**

**सिद्धिं कुर्वन् जगत्यां प्रचरति सुतरां यन्मुखात् संप्रवृत्तः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 91

**द.प्र -**

अस्मिन्जन्मनि इह मानुषजन्मनि, परस्मिन् पित्रादिलोकेषु अनुभविष्यमाण संस्थानविशेषेऽपि, द्वितय फलयुतः ऐहिकमामुष्मिकमिति द्विविधाभ्यां फलाभ्याँ युक्तः।

द्वयमेव द्वितयम्, संख्याव्ययाभ्यां तयप्। जामिताशून्यपन्थाः- क्रियाबाहुल्येन तन्त्रविस्तारेण च पुनःपुनरावृत्ति रहितत्वाच्च जामितया शून्यः पन्थाः मार्गः यस्य, सः उभयविधः, नैगम पौराणिक उपदेश भेदद्वय घटितः। पुनश्च दक्ष वामादितन्त्रः, दक्षः अपसव्यः, वामः सव्यः तावादी यस्य तत्, दक्षवामादि तन्त्रं यस्य सः। आदिशब्देन कापालिकादि बहुविधक्षुद्राचार प्रकाराः समुच्चीयन्ते।

तथाविधः श्रीविद्यासम्प्रदायः। श्रियः शोभायाः- लक्ष्म्याः- मोक्षसाम्राज्य संपत्त्याः- पिपीलिकादि ब्रह्मपर्यन्त विज्ञानरायः विद्या, श्रीविद्येति संप्रदायः। यद्वा द्यतीति वा विद्या। श्री शब्देन विषतुल्यं तामसं लक्ष्यते, तद्विशिष्टं द्यतीति अज्ञानतमोनाशिकेति वा श्रीविद्या। तस्याः विद्यायाः सम्प्रदायः, यन्मुखात् यस्य दत्तसद्गुरोर्मुखात्, वदन चन्द्रमसः संप्रवृत्तसन्न्, सम्यक् प्रकर्षेण वृत्तः प्रादुर्भूत स्सन्न् जगत्यां भुवनत्रयेऽपि, अनुष्ठातृणां सिद्धिं कुर्वन्न् वितन्वानः, सुतरां सुष्ठुतरं प्रचरति जेगीयते, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ अलर्क चक्रवर्ती

अ.व - कृत्स्नायां दत्तगाथायां, अपरीक्षापूर्वकं समासादित दत्ताश्रयं अलर्कराजं तदवगति विशेषोदन्तं च प्रस्तौति बाल्य इति।

**बाल्ये प्राप्ताऽऽत्म विद्यः प्रबल गुरु तरे राज्य भारेऽवबद्धः**

**काशीराजेन दैवा दचिर सुविजितो ऽलर्कराट् संस्मरन् प्राक्।**

**सङ्गं त्यक्त्वा सुखी स्या इति विदितमति र्मातृवाक्या-च्छ्रितो यं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 92

**द.प्र –**

अलर्कराट् अलर्कनामकः कश्चन राट् राजा चक्रवर्ती (पुण्यदम्पत्योः मदालसर्तुध्वजयोः अपत्यं पुमान्), बाल्ये शैशवाद्यवस्थायां मातुस्सकाशात्

प्राप्ताऽऽत्मविद्यः, प्राप्ता आत्मनः प्रत्यगात्मविवेचनपरा विद्या येन सः, मातुः स्तन्येन सह तदीयां मायाविदारिणीं विद्यामाप्नोदिति भावः। तथाविधस्सन्नपि राज्य धुरोत्स्रष्टुकामेन पित्रा देशपालने नियुक्तस्सन्, प्रबलगुरुतरे प्रबलश्चासौ गुरुतरश्च, नानाविध विषयवासनाभिः प्रबलः निग्रहानुग्रह संरक्षणादि पालनकार्यैः गुरुतरः। तस्मिन् राज्यभारे, प्रजानां धर्ममार्गावस्थापनं तस्मिन् विषये अवबद्धः धर्मपाशेन सँयतस्सन्न्, नितान्त विस्मृत मोक्षकामः वसति स्म।

बहोः कालादनन्तरं प्रत्यागतेन अग्रजेन सुबाहुना, स्वीयानुजः अलर्कः अधुनाऽपि वित्तैषणादिभ्यः अव्युत्थित इति परितापेन निमित्तभूतेन, काशीराजः स्वस्य राज्यलाभच्छलेन युद्धाय प्रेषित आसीत्।

ततः दैवात्, सुबाहोः योगबलाद्वा, तत्त्वस्मारण रूपभाग्याद्वा, काशीराजेन कर्त्रा समितौ समं साम्येन अतिविजितः अत्यन्तं पराजितस्सन्, प्राक् पूर्वकाले (स्वस्य राज्य स्वीकार काले) तपस्यानिर्गमनाय गच्छन्त्या मात्रा -
सङ्गं सर्वविधां सङ्गतिं त्यक्त्वा परित्यज्य सुखी सुखभाक् भूयाः - इति चोदितं वाक्यं संस्मरन्न् सञ्चिन्तयन्न, विदितमतिः सर्वसङ्गपरित्यागे विदिता निश्चिता बुद्धिः यस्य, स, मातृवाक्यात् मातुरुपदेशात् यं दत्तसद्गुरुं श्रितः आशिश्राय, तद्ब्रह्मण्यं भजेऽहम्।

प्रथमगुरुणा मात्रा स्वहिताय उपदिष्टं मार्गमवलम्बमानः सद्गुरुमाश्रित्य समतीतदुःखो बभूवेति भावः।

## ➢ दुःखहेतु विचरणा - अलर्कप्रबोधः

अ.व - स्वाश्रित मलर्कराजं, दुःख हेतु विचारणे सद्गुरुः प्रयोज्य, तद्द्वारा शोकमुन्मूलयामासेति च समाख्याति, दुःखमिति।

**दुःखं वेविक्ष्व सोम्य? त्रिभुवन मतत श्चात्मनो? नोत कस्य?**

**देहो जाड्याभिक्लृप्तो ननु विरहितचिद् वर्तते नास्य चापि।**

**भ्रान्त्या शोको हि तस्मात् त्यज विमतिमिति ज्ञापयित्वा य आवीत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 93**

**द.प्र –**

अलर्कराजं संबुध्य, प्रवर्तितेन संवादरूपेण वाक्य मारभ्यते।

हे सोम्य अङ्ग, (सोमे सोमपाने योग्य इति संबुद्धिवाचक विशेषण मेतत्।) दुःखं वेविक्ष्व, शोकस्य रूपं हेतुञ्च विचारय। अधीत शास्त्रविद्यस्य राज्ञः प्रत्यभिज्ञापनरूपेण दुःखमुन्मूलयितुं विचारणां प्रचक्रमे कस्य दुःखं भवतीति।

त्रिभुवनमततः त्रिभुवनं लोकत्रयं अततः सातत्यगमनेन अभिव्याप्तस्य आत्मनो वा? न। तथा भवितुं नार्हति इत्यलर्कवचनम्, दुःखस्य विश्लेष फलरूपत्वात्, अद्वितीयस्यात्मनो विश्लेषशून्यत्वाच्च, दुःखानुभवः अनुपपन्नः इति स्वारस्यम्।

उत कस्य दुःखम्? ननु जाड्याभिक्लृप्तः जाड्येन जडत्वेन अभिक्लृप्तः अवस्थितः देहः शरीरं, विरहितचित् विरहिता चित् येन सः देहः, अचेतनः खलु।
अस्य दुःखं वर्तते वा? नाप्यस्य विगतचेतनस्य विषयार्थग्रहणे शक्तिरिति, तस्यापि दुःखानुभवो न भवतीति समाधत्ते राजा।

शोकः दुःखं, भ्रान्त्या देहात्म संसर्गरूपया अविचारितरमणीयया मायया सञ्जायते। तस्माद्धेतोः विमतिं निर्द्वितीय ब्रह्मणो व्यतिरिक्त पदार्थ सद्भावं त्यज। द्वैतबुद्धिं विमुञ्चेति ज्ञापयित्वा, तत्त्वार्थं स्मारयित्वा, मोक्षकामाधारेण अलर्कराजं यः आवीत् संररक्ष, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ नहुष जननम्

अ.व - षड्चक्रवर्तिष्वन्यतमो नहुषोऽपि भगवत्कृपावशादेव जजानेति तत्कथां प्रस्तौति आयुरिति।

**आयू राजा स्वपत्यं जगदति महितं कामयित्वा कृतार्थः**

**शक्रस्थानार्ह पुण्यं नहुष वरसुतं यद्-घृणाया हि लेभे।**

**भूयो गर्भाद्यवस्था हनन परमतेर् हुण्डदैत्याच्च रक्षाम्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 94**

**द.प्र-** प्राक्तनकाले, आयुरिति नामको राजा, अनपत्यकः भार्यया सह जगदतिमहितं जगतः लोकस्य अतिमहितं अत्यन्तं पूजनीयं, स्वपत्यं शोभनं सन्तानं पुत्रं, कामयित्वा वाञ्छित्वा, कृतार्थः प्राप्तकामः बभूव।

शक्रस्थानार्हपुण्यं इन्द्रपदवी प्राप्तिकारकं पुण्यं यस्य तथाविधं, नहुषवरसुतं नहुष इति नामकं वरसुतं श्रेष्ठं पुत्रं, भूयः पुनश्च गर्भाद्यवस्थाहननपरमतेः- गर्भादि अवस्थासु, गर्भस्थ- प्रसव- शैशव- कौमारेषु अवस्थासु हननपरा जिघांसुका मतिः यस्य तस्मात्, हुण्डदैत्यात् तन्नामकाद्राक्षसात्। जनिष्यमाणः कुमारो मां हन्तेति भिया प्रागेव तं हन्तुं गर्भादितः प्रयतमानात् असुरात्। भी त्रार्थानां भयहेतिरिति राक्षसस्य अपादानसंज्ञा। राक्षसात्, कुमारस्य रक्षां रक्षणञ्च, यद्धृणायाः यस्य दत्तात्रेयस्य अनुकम्पायाः निमित्तात् लेभे, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ धर्मकीर्ति प्रबोधः

**अ.व-** दत्तसद्गुरुसम्मुखात् समग्रधर्मोपदेशं प्राप्तवन्तं धर्मकीर्तिं गुरुबोध प्रकारतया दृष्टान्तयति लिप्सूनामिति।

**लिप्सूनां ज्ञान मूरी करणमपि गुरो र्नित्य कर्तव्य मस्मात्**

**शुश्रूषाभ्यासदीक्षा स्थिरतरमतये धर्मशास्त्रं हि राज्ञे।**

**अन्वादिश्य प्रपूर्णं जगत उपकृतौ प्रक्रमं सन्दधौ यः**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 95

**द.प्र –** ज्ञानं अवगतिं, लिप्सूनां लब्धुमिच्छतां कामयमानानां, शिष्यवृत्ति मभीप्सतां, ऊरीकरणं अङ्गीकरणमपि गुरोः देशिकस्य नित्यकर्तव्यं भवति। अध्यापनेनैव आजन्मसंक्रान्तस्य ऋषिविषयिण ऋणस्य अपाकार्यत्वात् निरन्तरं नवानां शिष्याणां सन्निवेशनं, आचार्येणानुमन्येत। तथाविधा सदाचार्य मनोऽभिव्यक्तिः प्रशस्यते- यथाऽऽपः प्रवता यन्ति ... एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतः - इति तैत्तिरीय मन्त्रोक्ति रत्राभिमन्तव्या।

अस्माद्धेतोः आदिगुरुपदप्रसिद्धो देवः, शुश्रूषाभ्यास दीक्षा स्थिरतरमतये शुश्रूषा गुरुवाक्यश्रवणेच्छा, अभ्यासः श्रुतवाक्याना मनुष्ठान मनुष्ठापनञ्च, तयोः शुश्रूषाभ्यासयोः सम्बन्धिनी दीक्षा नियमः दीक्षायां स्थिरतरा द्रढीयसी मतिः बुद्धिः यस्य तस्मै, राज्ञे धर्मकीर्ति नामकाय कस्मैचिन्नृपाय, प्रपूर्णं विधिनिषेध काम्य प्रायश्चित्त शान्त्यादिभिः प्रचुरं, धर्मशास्त्रमन्वादिश्य वेदशास्त्रोपबृंहितं प्रबोध्य, जगतः धार्मिकलोकस्योपकृतौ महोपकारनिमित्ते, प्रक्रमं प्रकृष्टगतिं, यो हि देवः सन्दधौ, योग्याध्यापक-कर्तव्यरीतिं समर्थयामास, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ भ्रष्टेऽपि धर्मकीर्तौ कृपा

अ.व - नहि कल्याणकृत् कश्चित् दुर्गतिं तातगच्छतीति गीता स्मृतिं संस्मारयन्न्, प्रबल वासनावशात् धर्माध्वप्रच्युत मपि स्वशिष्यं धर्मकीर्तिं, अवसानसमये अयत्नपूर्वक सत्कर्मणि मनो निवेश्य गोपयामास देव इति तदुदन्तं सङ्गदति सामर्थ्यमिति।

**सामर्थ्यं योऽविजानन् स्वकमिह कुरुते यत्न मन्यस्य बोधे**

**विभ्रष्टो वा भविष्यन् गुरुवर सविधेऽवर्तमान, स्तथैव।**

**भ्रष्टं यो धर्मकीर्तिं निजमृति समये पूर्वपुण्यादरक्षत्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।। 96**

**द.प्र -**

स्वकं स्वस्मिन्निष्ठितं सामर्थ्यं विमत प्रत्याख्यानपूर्वक स्वयुक्ति संस्थापनशक्तिं, अविजानन् असंलक्ष्य, गुरुवरसविधे गुरोः सद्गुरोः सविधे सन्निधौ अवर्तमानः तत्सन्निधान लाभविहीनस्सन्, अन्यस्य धर्मप्रतिरोधिनः नास्तिक पाखण्डादेः बोधे शिक्षणे, तद्वारा निजमत प्रचारणे निमित्ते, यः शिष्यः, यत्नं प्रयासं कुरुते विरचयति, सः विभ्रष्टः धर्मप्रत्यायने असामर्थ्यात् परप्रत्यय नेयबुद्धिः, न्याय्यात् अनूचान धर्ममार्गात् विभ्रष्टः स्रस्तः भविष्यन्न् भविता।

दैवात् कदाचित् सफलतां वा प्राप्नुयात्। गुरुसन्निधि महिमा मूकमपि वाचालयति छिन्नजिह्वमपि वाक्पटुं करोतीत्यतः तन्महिम्ना असमर्थितः अनधिगत वादपटुत्वशक्तिः, प्रायेण भ्रश्येत।

तथैव भ्रष्टं सुपथात् प्रच्युतं, धर्मकीर्तिं तन्नामकं राजानं स्वशिष्यं, तदाचरित दुरिततति मगणयन् निजमृतिसमये, तस्य राज्ञः अवसानकाले पूर्वपुण्यात् पूर्वाचरित सदाचाररूप पुण्याद्धेतोः, यः अव्याजकरुणाबन्धुरो देवः अरक्षत्, तद्ब्रह्मण्यं भजेऽहम्।

यावज्जीव माचरितानां कर्मणां फलपरिपाकः, अवसानकाले अनुभूयेत- इति श्रुतिस्मृत्यनुभव सिद्धमेतत्। दैवात् मध्येमार्गं भ्रष्टस्यापि, प्राथमिकावस्थायां समाचरित-सुकृतफलमतिदिशन्न्, अन्तकाले स्वमात्मानं स्मारयन्न्, यदृच्छया एकादशी व्रतविहितोपवास जागरण स्मरण पारणादिकं अनुष्ठाप्य, दुरितानि उपशाम्य, समुज्जहार

देव इति ब्रह्माण्डपुराणगाथेह सम्बध्यते। भूयश्च, दैवतान्तरेण निरूढात् पापकृतां निग्रहणापेक्षया, दत्तसद्गुरुचेष्टितं पापकृद्बुद्धि संस्कारपूर्वक समुद्धरणं विशिष्यत इति स्वारस्य मत्र संगृह्यते ।

## जन्मान्तरानुग्रहः - भद्रशीलः

अ.व - सद्गुरूपाश्रयः जन्मान्तरेऽपि संभद्रकरो भवतीति भद्रशीलोदन्तं उदाहरति नैवेति।

**नैवाऽऽप्नोति क्वचैवं चिरमुत विपदं सद्गुरुं संश्रितस्सन्**

**मुञ्चन्तं नापि मुञ्चे न्निज पृथु करुणा-बन्धुरो वत्सलस्सः।**

**पूर्वस्मा ज्जन्मनो यो हितसुकृतभरं भद्रशीलं चकार**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 97

**द.प्र –** सद्गुरुं सत् ब्रह्म, तद्बोधक विद्याप्रदायकं गुरुं, संश्रितः आश्रितस्सन्न्, साधकश्शिष्यः, क्वचापि विपदं प्रत्यवायं चिरं बहुकालं नैवाप्नोति। प्रारब्धवशात् सञ्जातेऽपि प्रत्यवाये गुरुकृपाबलेन सन्निरुन्धे, शाश्वतिकीं दुर्गतिं नैवाप्नोति। पुनः चेतयते भक्त इति भावः।

एवञ्च मुञ्चन्तं स्वमाश्रयं उत त्यजन्तमपि शिष्यं, निजपृथु करुणाबन्धुरः स्वकीय बहुळ दयाबद्धः, सः सद्गुरुः नैव मुञ्चेत् तं शिष्यं मुञ्चेत् न कदापि परित्यजेत्। सकृत् प्रपन्नस्य गुरुकटाक्षवीक्षा प्रसारलाभः जन्मजन्मान्तरेषु ध्रुव इत्यभिप्रेयते। तथा हि। पूर्वस्मात् जन्मनः धर्मकीर्ति नामक राजजन्मनः, अनन्तराप्तजन्मानं भद्रशीलं तन्नामकं श्रोत्रिय कुमारं, हितसुकृतभरं हितञ्च तत् सुकृतञ्च, हितसुकृतं श्रेयोवापकं पुण्यकर्म। तस्य भरं पूर्णम्।

गतजनुष्याचरितैकादशी व्रताचार संस्कार युक्तं पुण्यकर्मस्वभिप्रवृत्तं, यो दत्तदेवश्चकार, तद्ब्रह्मण्यं भजेऽहम्।

## ➢ अवतार परम्परा

अ.व - भगवतः अवतारपरम्परां युगयुगान्तरे प्रवर्तितां मायामोहविमोचिकां प्रस्तौति मायेति।

**माया भ्रान्तान् समस्तान् पुनरपि जनितां- स्तारयेद्यो भवाब्धेः**

**यश्श्रीपादादि रूपी भुवि कृत विजयो रक्षितेति प्रसिद्धः।**

**भूयो भूयोऽवतीर्णो नतजन सुलभ स्सन्दयेताभियुक्तान्**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 98

**द.प्र –**

मायाभ्रान्तान् अविद्यया लक्षणेन मुग्धान्। लक्षणेत्थं भूतेति तृतीया। पुनरपि जनितान् संसारचक्रे बंभ्रम्यमाणत्वात् मृत्वा पुनर्जनितान्। मृत्वा पुनर्मृत्युमापद्यन्ते-अद्यमानाः स्वकर्मभिः- इति आरुणकेतुक चयनश्रुतिः। ध्रुवं जन्म मृतस्य चेति गीतास्मृतिश्च। (तथा कर्मफलानुभवचक्रे) समस्तान् सम्यगस्तान् प्रक्षिप्तान् जन्तून् द्विपदचतुष्पदः, भवाब्धेः दुस्तरणीयात् संसारसागरात्, नौकासन्निभ बोधनैः साधनेन यो देवः लीलया तारयेत्।

यः देवः, श्रीपादादि रूपी, श्रीपादवल्लभः आदिः येषां तानि रूपाण्यस्य। आदि शब्देन नरसिंहसरस्वतीरूपञ्च सङ्गृह्यते। भुवि इह भूलोके, कृतविजयः कृतो धर्मसंस्थापन विजयो येन, सः रक्षिता धर्मकर्माचरण प्रच्युतेः गोप्ता इति प्रसिद्धः विश्रुतः। नतजनसुलभः नतानां प्रणतानां भक्तानां सुलभः सुखेनोपेयः, तथैव भूयोभूयः मुहुर्मुहुः, अवतीर्णः बभूव विभिन्नकालेषु योऽवततार, तद्ब्रह्मण्यं भजेऽहम्।

## स्तुतिः

अ.व - भगवतो महिमानं, तदधिगमनोपायञ्च प्रदर्शयति नित्य इति।

**नित्य स्सिद्धो हि यस्याऽविचलित महिमा कर्मणा नाभिवर्ध्रः**

**ध्रौव्य स्थाणुत्व हेतो र्न च भवति पुनः पापलेशानुलेपः।**

**यस्यानिर्वाच्य तत्त्वं प्रणव रव भृतं मोह शोकादि दूरं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 99

**द.प्र –**

यस्य देवस्य अविचलितमहिमा अनपायिनी महत्ता, सिद्धः स्वतस्सिद्धः, नित्यः कालत्रयेऽपि सुस्थितः, कर्मणा सुकृतमिति प्रथितेन यज्ञ तपोदानादि कार्येण नाभिवर्ध्रः, नित्यसिद्धत्वात् पूर्णत्वाच्च वर्धयितुमशक्यः।

पुनश्च यस्य देवस्य, ध्रौव्य स्थाणुत्वहेतोः- ध्रुवः स्थिरः तस्य भावः ध्रौव्यम्। (ष्यञ् प्रत्ययः) साक्षिमात्रत्वात् कूटस्थतायाः सर्वात्मकत्वाच्च स्थाणुत्वं प्रसिद्धम्। एवं ध्रौव्य स्थाणुत्वयोः हेतोः, पापलेशानुलेपः पापानां स्वमधिष्ठितैः जीविभिः क्रियमाणानां दुरितानां लेशः, तस्यानुलेपः पापसङ्गतिर्न भवति। एष नित्यो महिमा- न कर्मणा वर्धते नो कनीयान्, न लिप्यते पापकेनेति वैश्वसृज चयन श्रुति रत्रानुसन्धेया।

एवञ्च यस्य भगवतः अनिर्वाच्य तत्त्वं निर्वक्तुं अशक्यं सत्त्वं, मोहशोकादिदूरं- मोहः व्यामोहः शोकः दुःखं आदिशब्देन लोभ कोप मत्सरादय स्संगृह्यन्ते। मोहशोकादयो दूरा भवन्ति यस्मादिति मोहशोकादिदूरम्। तथा च प्रणवस्य रवेण ओङ्कारशब्देन एकाक्षर शब्द ब्रह्मोपासनेनैव भृतं भ्रियमाणं अनुभाव्यं (यस्य तत्त्वं) भवति, तद्ब्रह्मण्यं भजेऽहम्।।

नित्यसिद्धमहिम्नः भगवतः मनोवाचामगोचरं तत्त्वं परिव्राड्योगिवर्यादिभिः प्रवर्तितेन प्रणवोपासनेनैवापरोक्षं भवतीति गम्यते।

### ➢ स्तुतिः

अ.व- अनेकधा संवर्णितं दत्तगाथामृतं शुद्धचैतन्य रूपभवनया संस्थापयति शुद्धमिति।

**शुद्धं चैतन्यमूर्तिं वरद मभयदं ज्ञान विज्ञानकन्दं**

**बोधाऽऽत्मानं बृहन्तं श्रुति सुविदितरै र्नोपलभ्यं प्रपूर्णम्।**

**स्वानन्दैकामृताब्धिं शिवतम मनिशं मादृशै र्भाव्यमानं**

**तद् ब्रह्मण्यं भजेऽहं मम हृदि सदयं सच्चिदानन्द दत्तम्।।** 100

**द.प्र -** शुद्धं किल्बिषशून्यं, चैतन्यमूर्तिं चिन्मात्रस्वरूपं, ज्ञानविज्ञानकन्दं ज्ञानस्य गुरूपदेशादिभिः प्राप्तस्य विद्यारूपस्य विज्ञानस्य श्रुतार्थानां मनन निदिध्यासन द्वारा सञ्जतानुभवस्य च कन्दं मूलस्थानं बुध्नियं, वरदं वरं कमनीयं अपवर्गं ददातीति वरदः, तं वरदं, अभयदं निर्धूत भेदभावत्वात् न भवति भयः यस्मात् सः अभयः, तन्ददातीति अभयदः, तम्।

बोधात्मानं शुद्धज्ञानरूपं, बृहन्तं सर्वस्मात् वस्तुजातादपि बृहत्तरं, श्रुतिसुविदितरैः- श्रुत्याः वेदस्य तत्रत्य विज्ञानस्य सुविदः ज्ञानिनः, तेभ्य इतरैः वेदविज्ञानहीनैः नोपलभ्यं उपलब्धुं दुश्शकं, प्रपूर्णं अन्यूनत्वात् परिपूर्णं, स्वानन्दैकामृताब्धिं स्वस्याऽऽत्मनः आनन्दः स्वानन्दः। एकञ्चामृतञ्च एकामृतमिति विशेषणोभयपदबहुव्रीहिः। एकं केवलम्, एके मुख्यान्यकेवला इति विश्वः। अमृतं जरामरणरहितम्। स्वानन्द एव एकामृतम्। तस्याब्धिः सागरः, तम्। अपरिक्षीयमाणात्मानन्दरसपूर्णमिति यावत्।

शिवतमं मङ्गलमयत्वेन प्रथितेषु अतिशयितसारं, अनिशं न भवति निशा समाप्तिः यथा तथा सर्वदा, मादृशैः मया मत्सन्निभैः, भगवद्ध्यान धारण समाधित्सुभिः भाव्यमानं चेतसि संभावित स्वसत्ताकं तद्ब्रह्मण्यं भजेऽहम्।।

सर्वजीविपर्यायित्वेन प्रसिद्धः तच्छब्दः। ब्रह्म बृंहितत्वात् जीवानुप्रवेशेन विवृद्धत्वात् बृहत्तमम्। तदेव ब्रह्म। तद्ब्रह्म। तस्मिन्ब्रह्मणि भवं स्वीकृत सगुणरूपं तद्ब्रह्मण्यम्। सदयम् - दयेति धातुः दान गति रक्षण हिंसा आदानेषु वर्तते। एवं दया नाम जीविनां याचना कामना, अर्घ्यमाणा भगवता दीयमाना रक्षणा, अजस्र मनुभूयमाना भगवतो गतिः सन्निधिर्वा। तथाविधया दयया सह भवतीति सदयः, तम्।

सच्चिदानन्ददत्तम् सत् चित् आनन्दपदैः समाहृतं दत्तं, लोकोद्धरणदीक्षायां उररीकृतात्मदानं, वर्तमानकालेऽपि संभृत नानावतारैः दत्तं आत्मदानशीलं दत्तसद्गुरुं मम हृदि मनसि भजेऽहं अहं सेवे।

तद्वा इदं मनस्येव परमं प्रतिष्ठितमिति श्रुतिस्वारस्यबलेन भगवतोऽनुभवाय शरीरचेष्टितानि, उच्चारण नमन कीर्तन प्रदक्षिणादीन्यतीत्य मानसोपासनं विशिष्यते। अत एव अद्वयब्रह्मणः अपरोक्षत्वं प्रसिध्यति। मामकं सद्गुरुं मनसि भावयामीति निर्विशेष ब्रह्माकारकारित्ववृत्तिं लक्षयन्न् उपरमते ।

## ➢ फलश्रुतिः

**स्वामिश्री सच्चिदानन्द गुरुबोधामृतोद्भवम्।**

**शतकं दत्तदेवस्य दत्तत्वं पठिता भजेत्।।**

श्री गणपति सच्चिदानन्द स्वामिनाम्ना प्रसिद्धस्य सद्गुरोः बोधनात्मकात् पीयूषात् समुद्भूतं दत्तात्रेयस्वामिनः शतकमिदं पठिता प्रपाठकः, दत्तत्वं साक्षाद्दत्तात्रेयतत्त्वं भजेत् समासीदेत्। भ्रमरकीटन्यायेन सदा तल्लग्नचेताः तन्मयो भवतीति प्रसिद्ध्यति हि।

**गुरुवर सुख बोधा दात्त दत्त प्रकाशः**

**वितरति घनपाठी दत्त सेवानुरक्तः।**

**उपकृति मुद मिच्छु र्दत्त भक्तेषु नित्यम्**

**अधिगत करुणांशा ज्जात पद्योपहारम्।।**

निजसद्गुरोः श्री गणपति सच्चिदानन्द सँयमिवरस्य सुखबोधनैः, भगवतः दत्तात्रेयस्य गाथामृतं संपाद्य, तत्संलब्धात् करुणालेशवशात् प्रादुर्भूतं शतसंख्यात्मकं पद्यसमूहरूप मुपहारं, दत्तात्रेय भक्तेषु विषये नित्यमुपकारकतोषं समिच्छन्न्, तस्य दत्तसद्गुरोः सेवाभिलाषुकस्सन्न् घनपाठीति उपाह्वः वंशीकृष्णः नित्यं वितनोति।

**विदित परम दत्तैश्वर्य दिव्य प्रभावं**

**लसतु शतक मेत द्दत्तदेवस्य हृद्यम्।**

**गुरुवर चरणाब्जं सेवमानेषु नित्यं**

**जयतु च महितेऽस्मिन् दत्तपीठे विशिष्टम्।।**

दत्तसद्गुरोः महितैश्वर्य संवेदकं स्वनिष्ठ श्रुतिस्मृत्यक्षर मन्त्रयुक्ति विशिष्टं दत्तदेवस्यान्तरङ्गिक मेतच्छतकं, गुरुसेवकैः नित्यं पापठ्यमानं लसतु। महितेऽस्मिन्न् अवधूतदत्तपीठे पारायणक्रमेण जयतु।

एवं सनातनस्य देवस्य तत्त्वं स्वगुरुभिः प्रोच्यमानं प्रणेत्रा संगृहीतं भक्तमानसेषु शश्वत् विजयताम्।।